अनुवाद उन्होंने मेरी प्रेरणाको पाकर उसे मान देते हुए बड़े ही उदार एवं सेवाभावसे प्रस्तुत किया है अतः इसके लिये मैं उनका बहुत आभारी हूँ! अनुवाद कैसा रहा, इसके बतलानेकी यहां जरूरत नहीं, विज्ञ पाठक स्वयं ही उसे पढ़ते समय समझ सकते हैं। हाँ, अनुवादकजीने अपने 'दो शब्दों' में जो यह प्रकट किया है कि 'जिस रूपमें इसे जनताके समक्ष रखना चाहता था उस रूपमें साधनाभावके कारण नहीं रख सका हूँ' वह अनेक अंशोंमें ठीक जरूर है; फिर भी यह अनुवाद पूर्व प्रकाशित अनुवादसे बहुत अच्छा रहा है। इसमें चित्रालंकारोंकी अच्छी चर्चा की गई है और विषयके स्पष्टीकरणादिकी दृष्टिसे दूसरी भी अनेक अच्छी बातोंका समावेश हुआ है। संशोधनका भी कितना ही कार्य अनुवादकजीके द्वारा हुआ है परन्तु उसका अधिकांश श्रेय देहली-धर्मपुराके नया मन्दिरकी उस हस्तलिखित प्रतिको प्राप्त हैं जिस परसे मैंने बहुत वर्ष पहले अपनी प्रतिमें मिलानके नोट कर रक्खे थे और जिनके आधारपर अनेक त्रुटित पाठों तथा दूसरे संशोधनोंको टीकामें छपते समय स्थान दिया गया है। साथमें पद्यानुक्रमकी भी योजना की गई है और चित्रालंकारोंको समझनेके लिये परिशिष्टमें कुछ सूचनाएँ भी कर दी गई हैं। इस तरह ग्रन्थके प्रस्तुत संस्करणको उपयोगी बनानेकी यथासाध्य चेष्टा की गई है। आशा है पाठक इससे जरूर उपकृत होंगे।

दरियागंज, देहली
ता० २१ जुलाई १९५०

जुगलकिशोर मुख्तार

मगलाचरण

यच्चेतोर्जलधेर्जातं स्तुतिविद्या-सुधाभरम् ।
निपीय निर्जरी जाता विबुधा जगती-तले ॥१॥

उद्दण्ड-वादि-वेतण्ड-गण्ड-मण्डल-दण्डनः ।
जीयात्समन्तभद्रोऽसौ जिताऽभद्र-ततिः सदा ॥२॥

—अनुवादक

श्रीमत्स्वामिसमन्तभद्राचार्यविरचित—

स्तुति-विद्या

अपर नाम

जिन-शतक

संस्कृतटीका तथा हिन्दी अनुवाद-सहित

(टीकाकारस्य मंगलाचरणम्)

नमो वृषभनाथाय लोकाऽलोकाऽवलोकिने ।
मोहपङ्कविशोषाय भासिने जिनभानवे ॥१॥
समन्तभद्रं सद्बोधं[1] स्तुवे वर-गुणालयम् ।
निर्म्मलं यद्यशस्कान्तं बभूव भुवनत्रयम् ॥२॥
यस्य च सद्गुणाधारा कृतिरेषा सुपद्मिनी ।
जिनशतकनामेति योगिनामपि दुष्करा ॥३॥
तस्याः प्रबोधकः कश्चिन्नास्तीति विदुषां मतिः ।
यावत्तावद्भवैको नरसिंहो विभाकरः ॥४॥
दुर्गमं दुर्गमं काव्यं श्रूयते महतां वचः ।
नरसिंहं पुनः प्राप्तं सुगमं सुगमं भवेत् ॥५॥
स्तुतिविद्यां समाश्रित्य कस्य न क्रमते मतिः ।
तद्वृत्तिं येन[2] जाड्ये तु कुरुते वसुनन्द्यपि ॥६॥
आश्रयाज्जायते लोके निःप्रभोऽपि महाद्युतिः ।
गिरिराजं श्रितःकाको धत्ते हि कनकच्छविम् ॥७॥

---

1 महाबोधं । 2 'तद्वृत्तिं यो न बोध्येत कुरुते वसुनन्द्यपि' इति पुस्तकान्तरे पाठः ।

वृषभादि-चतुर्विंशति-तीर्थकराणां तीर्थंकरनामकर्मोदयवायुसमूहोद्वर्तितसौधर्मेन्द्रादिसुरवरसेनावारिधिभाक्तिकजनसमुपनीतेज्याविधानार्हाणां घातिकर्मक्षयानन्तरसमुद्भूतविषयीकृतानेकजीवादिद्रव्यत्रिकालगोचरानन्तपर्यायकेवलज्ञानानां स्तुतिरियं जिनशतकनामेति। तस्याः समस्तगुणगणोपेतायाः सर्वालंकारभूषितायाः घनकठिनघातिकर्म्मेन्धनदहनसमर्थायाः तार्किकचूडामणिश्रीमत्समन्तभद्राचार्यविरचितायाः संक्षेपभूतं विवरणं क्रियते।

ऋषभस्तुतिः

(मुरजबन्धः[1])

श्रीमज्जिनपदाऽभ्याशं प्रतिपद्याऽऽगसां जये।
कामस्थानप्रदानेशं स्तुतिविद्यां प्रसाधये ॥ १ ॥

श्रीमज्जिनेति। पूर्वार्द्धमेकपंक्त्याकारेण व्यवस्थास्य पश्चार्द्धमप्येकपंक्त्याकारेण तस्याधः कृत्वा मुरजबन्धो निरूपयितव्यः। प्रथमपंक्तेः

---

१ 'मुरजबन्ध' नामक चित्रालङ्कार का लक्षण इस प्रकार है—

'पूर्वार्धमूर्ध्वपङ्क्तौ तु लिखित्वार्द्धं परं त्वतः।
एकान्तरितमूर्ध्वाधो मुरजं निगदेत्कविः ॥'

'पूर्वार्धमेकपङ्क्त्याकारेण व्यवस्थाप्य पश्चार्द्धमप्येकपङ्क्त्याकारेण तस्याधः कृत्वा मुरजबन्धोनिरूपयितव्यः। प्रथम पङ्क्तेः प्रथमाक्षरं द्वितीयपङ्क्ते द्वितीयाक्षरेण सह, द्वितीयपङ्क्तेः प्रथमाक्षरं प्रथम पङ्क्तेर्द्वितीयाक्षरेण सह, एवमुभयपङ्क्त्यक्षरेषु सर्वेषु संयोज्यमाचरमात्।'

—अलंकारचिन्तामणिः

अर्थात्— पहले श्लोकके पूर्वार्धको पंक्तिके आकारमें लिख कर, उत्तरार्धको भी पंक्तिके आकार में उसके नीचे लिखे। इस अलंकारमें प्रथम पंक्तिके प्रथम अक्षरको द्वितीय पंक्तिके द्वितीय अक्षरके साथ और द्वितीय पंक्तिके प्रथम अक्षरको प्रथम पंक्तिके द्वितीय अक्षरके साथ मिलाकर पढ़ना चाहिये। यही क्रम श्लोकके अन्तिम अक्षर तक जारी

प्रथमाक्षरं द्वितीयपंक्ते द्वितीयाक्षरेण सह, द्वितीयपंक्तेः प्रथमाक्षरं प्रथमपंक्ते द्वितीयाक्षरेण सह एवमुभयपंक्त्यक्षरेषु सर्वेषु संयोज्यम् । एवं सर्वेऽपि मुरजबन्धा द्रष्टव्याः ।

रखना चाहिये । यह सामान्य 'मुरजबंध' का लक्षण है । यह अलंकार इस स्तुतिविद्याके २, ६, ७, ८, ९, २९, ३०, ३१, ३२, ३३, ३४, ३५, ३९, ४०, ४१, ४२, ४५, ४९, ५८, ५९, ६०, ६१, ६२, ६३, ६५, ६७, ६८, ६९, ७०, ७१, ७३, ७४, ७५, ७६, ७७, ७८, ८०, ८२, ९९, १०१, १०२, १०३, १०४, और १०५ नम्बरके पद्यों में भी है। इस मुरजबन्ध का चित्र परिशिष्ट में देखिये । 'मुरजबन्ध' की रचना मुरज (मृदङ्ग) के आकार हो जाती है, इस लिए इसका यह नाम सार्थक है।

यह अलंकार 'अनन्तरपादमुरज' 'इष्टपादमुरज' आदिके भेदसे कई तरहका होता है । 'अनन्तरपादमुरज' प्रथम-द्वितीय और तृतीय-चतुर्थ पादमें होता है । यह भेद इस पुस्तकके ४८, ६४, ६६, और १०० नम्बरके श्लोकोंमें है । इन श्लोकोंके चारों चरणोंको नीचे-नीचे फैलाकर लिखना चाहिये । चित्र परिशिष्टमें देखिये । 'इष्टपादमुरज' में चारों पादोंका अपनी इच्छानुसार सम्बन्ध जोड़ा जाता है । यह भेद इस पुस्तकके ५०, ८९, और ९१ नम्बरके श्लोकों में है । इसके भी चारों चरणोंको नीचे-नीचे फैलाकर लिखना चाहिये । यह अलंकार कई जगह गुप्तक्रिया, गुप्तकर्म, निरोष्ठ्यव्यञ्जनचित्र, गोमूत्रिका, पद्मबन्ध तथा यमक आदिके साथ भी आता है । वहाँ दो शब्दालङ्कारोंकी तिल-तण्डुलवत् निरपेक्ष संसृष्टि समझना चाहिये । अलङ्कारचिन्तामणि में मुरज-बन्ध बनानेका एक प्रकार और भी लिखा है जो कि इस पुस्तकके ६ नम्बरके श्लोकमें अपनाया गया है । वह यह है—

श्लोकके चारों पदोंको नीचे-नीचे लिखकर प्रथम पादके प्रथम अक्षर को तृतीय पादके, द्वितीय अक्षरके साथ और तृतीय पादके प्रथम अक्षरको प्रथम पादके द्वितीय अक्षरके साथ मिलाकर पढ़ना चाहिये । यह क्रम पादकी समाप्ति पर्यन्त जारी रहता है । फिर द्वितीय पादके

अस्य विवरणं क्रियते । श्रीर्विद्यते यस्य स श्रीमान् जिनस्य पदाभ्याशः पदसमीपं जिनपदाभ्याशः श्रीमांश्चासौ जिनपदाभ्याशश्च श्रीमज्जिन-पदाभ्याशस्तं श्रीमज्जिनपदाभ्याशं । प्रतिपद्य संप्राप्य प्रतिपद्येति प्रति-पूर्वस्य पदेः क्त्वान्तस्य प्रयोगः । आगमां पापानां जये जयहेतोर्निमित्ते इदमियम् । कामं इष्टं कमनीयं इच्छा वा स्थानं निवासः कामं च तत्स्थानं च कामस्य वा स्थानं कामस्थानं तस्य प्रदानं कामस्थानप्रदानं अथवा कामश्च स्थानं च कामस्थाने तयोः प्रदानं कामस्थानप्रदानं तस्य ईशः कामस्थानप्रदानेशः तं कामस्थानप्रदानेशं, प्रथमपादेन सह सम्बन्धः । स्तुतिरेव विद्या स्तुतिविद्या तां प्रसाधये अहमिति सम्बन्धः । अथवा कामस्थानप्रदानेशमिति स्तुतिविद्याया विशेषणम्, कामस्थानप्रदानस्य ईष्ट इति कामस्थानप्रदानेट् अतस्तां । किमुक्तं भवति—श्रीमज्जिनपदा-भ्याशं प्रतिपद्य स्तुतिविद्यां प्रसाधयेऽहं किं विशिष्टां स्तुतिविद्यां कथं-

---

प्रथम अक्षरको चतुर्थ पादके द्वितीय अक्षरके साथ और चतुर्थ पादके प्रथम अक्षरको द्वितीय पादके द्वितीय अक्षरके साथ मिलाकर पढ़ना चाहिये। यह क्रम भी पादको समाप्ति-पर्यन्त जारी रहता है।

अलंकारचिन्तामणिमें मुरजबन्ध आदि चित्रालंकारोंका जो विस्तृत वर्णन किया गया है, वह जिनशतकालंकारकी संस्कृत टीकाके आधारपर किया गया मालूम होता है। अभी हमने ऊपर मुरजबन्ध-के जो संस्कृत लक्षण अलंकारचिन्तामणिमे उद्धृत किये हैं उनमें से 'पूर्वार्धमेकं' श्लोकको छोड़कर सब ज्यों-का-त्यों जिनशतकालंकारके प्रथम और छठवें श्लोककी संस्कृत टीकाके वाक्योंसे मिलता है। जिन-शतकालंकारके कई श्लोक संस्कृतटीका—सहित अलंकारचिन्तामणिमें उद्धृत किये गये हैं। यह बात अलंकारचिन्तामणिके कर्ताने स्वयं अपने शब्दोंमें स्वीकृत की है। यथा—

श्रीमत्समन्तभद्रार्य-जिनसेनादिभाषितम् ।
लक्ष्यमात्रं लिखामि स्वनामसूचितलक्षणम् ॥२८॥

भूतं वा जिनपदाभ्याशं कामस्थानप्रदानेशं । किमर्थं आगसां जये जयनिमित्तं । प्रसाधये इति च प्रपूर्वस्यसाध संसिद्धावित्यस्य धोः णिजन्तस्य लडंतस्य प्रयोगः ॥ १ ॥

अर्थ—कामस्थानको—इष्टस्थान (मोक्ष)को इन्द्रियसुखके स्थान स्वर्गादिकको, इन्द्रिय विषयोंकी रोक-थामको, अथवा सुख और संसार परिभ्रमणसे निवृत्ति रूप स्वात्मस्थिति इन दोनोंको प्रदान करनेमें समर्थ श्रीमान्—केवलज्ञान आदि लक्ष्मीसे सम्पन्न—जिनेन्द्रदेवके पद-सामीप्यको प्राप्त करके—उनके चरण-शरणमें जाकर, पापोंको जीतनेके लिये मोहादिक पापकर्मों अथवा हिंसादिक दुष्कृतों पर विजय प्राप्त करनेके लिए - मैं इस स्तुतिविद्याको प्रसाधना करना चाहता हूं—उसे सब प्रकारसे सिद्ध करनेके लिए उद्यत हूं—जो उत्तम कामस्थानको प्रदान करनेमें समर्थ है।

भावार्थ—स्तुतिरूप विद्याकी सिद्धिमें भले प्रकार संलग्न होनेसे शुभ परिणामोंद्वारा पापोंपर विजय प्राप्त होती है और उसीका फल उक्त कामस्थानकी संप्राप्ति है। इसीलिए स्वामी समन्तभद्र जिनेन्द्रदेवके सन्मुख जाकर—उनकी वीतरागमूर्तिके सम्मुख स्थित होकर अथवा उसे अपने हृदयमन्दिरमें विराजमान कर—उनकी यह स्तुति करनेमें प्रवृत्त हुए हैं ॥१॥

(मुरजबन्धो गोमूत्रिकाबन्धश्च)

स्नात स्वमलगम्भीरं जिनामितगुणार्णवम् ।
पूतश्रीमज्जगत्सारं जनायात क्षणाच्छिवम् ॥ २ ॥

स्नात स्वमलेति । मुरजबन्धः पूर्ववद्द्रष्टव्यः । स्नात इति क्रियापदं ष्णा शौच इत्यस्य धोः लोडंतस्य रूपं । सुष्ठु न विद्यते मलं यस्य स स्वमलः गंभीरः अगाधः स्वमलश्चासौ गंभीरश्च स्वमलगंभीरः अतस्तं स्वम-

लगंभीरम् । न मिताः अमिताश्च ते गुणाश्च ते अमितगुणाः जिनस्यामित-गुणाः जिनामितगुणाः जिनामितगुणा एव अर्णवः समुद्रः अथवा जिन एव अमितगुणार्णवः जिनामितगुणार्णवस्तं । पूतः पवित्रः श्रीमान् श्रीयुक्तः जगतां सारो जगत्सारः पूतश्च श्रीमांश्च जगत्सारश्च पूतश्रीमज्ज-गत्सारः तं । जनाः लोकाः । यात इति क्रियापदं । या गताविस्यस्य धोः लोडंतस्य प्रयोगः । क्षणाद्चिराद्चिरेणेत्यर्थः । शिवं शोभनं शिवरूप-मित्यर्थः । किमुक्तं भवति––हे जना जिनामितगुणार्णवं यात, स्नात अथवा जिनामितगुणार्णवं स्नात येन क्षणाच्छिवं यात इति । शेषाणि पदानि जिनामितगुणार्णवस्य विशेषणानि ॥२॥

अर्थ—हे भव्यजनो ! जिनेन्द्रदेव का जो अपरिमित गुण-समुद्र है वह अत्यन्त निर्मल, गम्भीर, पवित्र, श्रीसम्पन्न और जगत्का सारभूत है। तुम उसमें स्नान करो—एकाग्र चित्त होकर उसमें अवगाहन करो, उसके गुणोंको पूर्णतया अप-नाओ और (फलस्वरूप) शीघ्र ही शिवको—आत्मकल्याण-को—प्राप्त करो ।

भवार्थ—उक्त गुणविशिष्ट जिनगुणसमुद्रमें भक्तिपूर्वक स्नान करनेसे--श्रद्धाके साथ जिनेन्द्र गुणोंको आत्मगुण समझकर अपनानेसे—शीघ्र ही आत्मकल्याण सधता है। इसीसे जिन गुणसमुद्रमें स्नानकी सार्थक प्रेरणा की गई है ॥२॥

(अर्द्धभ्रमगूढपश्चार्द्धः[1])

धिया ये श्रितयेतार्त्या यानुपायान्वरानताः ।
येऽपापा यातपारा ये श्रियाऽऽयातानतन्वत ॥ ३ ॥

१ यहां अर्धभ्रम और गूढपश्चार्ध नामक चित्रालंकार है। उसका विवरण निम्न प्रकार है—

श्लोकके चारों चरणोंको नीचे-नीचे फैलाकर लिखिये। चरों चरणोंके प्रथम और अन्तिम चार अक्षरोंके मिलानेसे श्लोकका पहला पाद बन

आसते सततं ये च सति पुर्वक्षयालये।
ते पुण्यदा रतायातं सर्वदा माऽभिरक्षत ॥४॥

(युग्मम्[२])

धियेति। अर्द्धभ्रमगूढपश्चार्द्धः। कोऽस्यार्थः चतुरोऽपि पादानधोऽधो विन्यस्य चतुर्णां पादानां चत्वारि प्रथमाक्षराणि अन्त्याक्षराणि चत्वारि-गृहीत्वा प्रथमः पादो भवति। पुनरपि तेषां द्वितीयाक्षराणि चत्वार्यन्त्य-समोपाक्षराणि च चत्वारि गृहीत्वा द्वितीयः पादो भवति। एवं चत्वारोऽपि पादाः साध्याः। अनेन न्यायेन अर्द्धभ्रमो भवति। प्रथमार्द्धे यान्यक्षराणि तेषु पश्चिमार्द्धाक्षराणि सर्वाणि प्रविशन्ति। एकस्मिन्नपि समानाक्षरे

जाता है। उन्हीं चारों चरणोंके द्वितीय तथा उपान्त्य अक्षर मिलानेसे द्वितीय पाद बन जाता है। इसी तरह तृतीय और चतुर्थ पाद भी सिद्ध कर लेना चाहिये। इस न्यायसे यह श्लोक अर्धभ्रम कहलाता है। इस श्लोकके पूर्वार्धमें जो अक्षर आये हैं उन्हींमें उत्तरार्धके सब अक्षर प्रविष्ट हो जाते हैं। एक समान अक्षरमें अनेक समानाक्षरोंका भी प्रवेश हो सकता है। इसलिये इसे गूढ पश्चार्ध (जिसका पश्चार्ध भाग पूर्वार्ध भागमें भी गुप्त हो जावे) कहते हैं। (अलंकारचिन्तामणि पृष्ठ ३६) यह अलंकार इस पुस्तकके ४, १८, १६, २०, २१, २७, ३६, ४३, ४४, ५६, ६० और ६२ नम्बरके श्लोकोंमें भी है। इस अलंकारमें कभी द्वितीय, कभी तृतीय और कभी चतुर्थ पाद भी गूढ हो जाता है। जैसे कि इसी पुस्तकके ३६वें श्लोकमें द्वितीयपाद और ४३वें श्लोकमें चतुर्थपाद गूढ हो गया है। अर्धभ्रकका चित्र परिशिष्टमें देखिये।

[२] 'द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्।
कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥'

दो, तीन, चार और उसके ऊपरके श्लोकोंमें क्रियासम्बन्ध होनेपर क्रमसे उनकी युग्म, विशेषक, कलापक, और कुलक संज्ञा होती है।

बहूनामपि समानाक्षराणां प्रवेशो भवति। अतो गूढपश्चार्द्धोऽप्ययं भवति। एवमेव जातीयाः श्लोका मृग्याः।

धिया बुद्ध्या। ये यदो रूपं। श्रितया आश्रितया सेव्यया इत्यर्थः। इता, विनष्टा अर्त्तिः मनःपीडा यस्याः सेयमितार्तिः तया। यान् यदः शसंतस्य प्रयोगः। उपायान् उपपूर्वस्य अयगतौ अस्याजन्तस्य रूपं उपगम्यानित्यर्थः। वराः प्रधानाः इन्द्रादयः नताः प्रणताः। ये च वक्ष्यमाणेन च शब्देन सह संबन्धः। न विद्यते पापं येषां ते अपापाः शुद्धाः कर्मरहिता इत्यर्थः। यातं पारं यैस्ते यातपाराः अधिगतसर्वपदार्थाः इत्यर्थः। ये च श्रीलक्ष्मीस्तया आयातान् अतन्वत तनु विस्तारे इत्यस्य धोर्लुङन्तस्य रूपम्। यथा द्रव्येण राजानः आश्रितान् विस्तारयन्ति। उत्तरत्र क्रियापदं तिष्ठति तेन सह सम्बन्धः॥३॥

आसत इति। आसते आस उपवेशने इत्यस्य धोः लङन्तस्य प्रयोगः। सततं सर्वकालं। ये च, च शब्दः समुच्चये, यदः प्रयोगान् जसन्तान् समुच्चिनोति पूर्वप्रक्रान्तान्। सति शोभने सतः ईबन्तस्य रूपम्। न विद्यते क्षयः विनाशो यस्यासावक्षयः। आलयः अवस्थानम्। अक्षयश्चासावालयश्च अक्षयालयः, पुरुश्चासावक्षयालयश्च पुर्वक्षयालयः तस्मिन् पुर्वक्षयालये। ते तदः प्रयोगोऽयम्, यदः प्रयोगानपेक्षते। पुण्यं ददते इति पुण्यदाः। रतेनायातः रतायातः अतस्तम्। रागेणागतं भक्त्या गतमित्यर्थः। सर्वदा सर्वकालं। मा अस्मदः इबन्तस्य प्रयोगः। अभिरक्षत क्रियापदम्। अभिपूर्वस्य 'रक्ष पालने' इत्यस्य धोः लोडन्तस्य प्रयोगः। ते इति अभिरक्षत इति च यदो रूपेण जसन्तेन सह प्रत्येकमभिसम्बध्यते। किमुक्तं भवति—वराः यान् उपायान् नताः प्रणताः धिया, किं विशिष्टया श्रितया, पुनरपि इतार्त्या। किमुक्तं भवति—प्रेक्षापूर्वकारिभिः ये स्तुताः ते मा रतायातं अभिरक्षत, ये च अपापा ये च यातपाराः ये च श्रिया आयातान् प्रणतान् अतन्वत विस्तारयन्तिस्म ये च सति पुर्वक्षयालये सिद्धत्वपर्याये सततं आसते ये च पुण्यदाः ते यूयं मा सर्वदा रतेन भक्त्यागतं अभिरक्षत पालयत इत्युक्तं भवति ॥४॥

अर्थ—जो पीडारहित—अनन्तसुखसम्पन्न है, प्राप्त हुई—ज्ञानावरणकर्मके अत्यन्त क्षयसे उपलब्ध—केवलज्ञानरूपी बुद्धिसे सहित हैं; जिन्हें उपाय-उपगम्य-सेवनीक (समझकर) इन्द्र आदि श्रेष्ठ पुरुष नमस्कार करते हैं; जो पाप-कर्ममलसे रहित हैं; जो (संसार-समुद्रके) पारको पा चुके हैं अथवा जिन्होंने सब पदार्थ जान लिये हैं; जो शरणमें आये हुए भव्यपुरुषोंको लक्ष्मीद्वारा विस्तृत करते हैं—केवलज्ञानादि लक्ष्मीसे युक्त करते हैं और जो उत्कृष्ट तथा अविनाशी मोक्षमन्दिरमें सदा निवास करते हैं वे कल्याणप्रदाता जिनेन्द्र भगवान् भक्तिसे सन्मुख आये हुए मुझ भक्तकी सदा रक्षा करें—उनके भक्तिपूर्वक आराधनसे मैं अपना आत्मविकास करनेमें समर्थ हो सकूं ।।३, ४।।

(साधिकपादाभ्यासयमकः[1])

नतपीला[2]सनाशोक सुमनोवर्षभामितः[3] ।
भामण्डलासनाऽशोकसुमनोवर्षभाषितः ।।५।।

१ यहां प्रथम पादके अन्तिम पांच अक्षरों और द्वितीय पादकी पुनरावृत्ति की गई है, अतः 'साधिकपादाभ्यास यमकालंकार' है जिसका लक्षण निम्न प्रकार है :—

'श्लोकपादपदावृत्तिर्वर्णावृत्तिर्युताऽयुता ।
भिन्नवाच्यादिमध्यान्तविषया यमकं हि तत् ।।'

—अलंकार चिन्तामणि, पृष्ठ ४६ ।

जहां अर्थकी भिन्नता रहते हुए श्लोक, पाद, पद और वर्णोंकी पुनरावृत्ति होती है वहां यमकालंकार होता है । वह आवृत्ति पादके आदि मध्य अथवा अन्तमें होती है तथा कहीं अन्य पाद पद और वर्णोंसे व्यवहित होती है और कहीं अव्यवहित । अलंकारविषयके प्राचीन ग्रन्थोंमें इस अलंकारके अनेक भेद बतलाये हैं परन्तु

(गुप्तक्रियो मुरजबन्धः ।)

दिव्यै[१]र्ध्वनिसितच्छत्रचामरैर्दुन्दुभिस्वनैः ।
दिव्यैर्विनिर्मितस्तोत्रश्रमदर्दुरिभिर्जनैः ॥६॥

(युग्मं)

---

१ यहां आवश्यक समझ कर सिर्फ ११भेदोंका वर्णन किया जाता है—(१) जहां प्रथम और द्वितीय पादमें समानता हो उसे मुख यमक,(२)जहां प्रथम और तृतीय पाद में समानता हो उसे सन्दंश, (३) जहां प्रथम और चतुर्थपादमें समानता हो उसे आवृत्ति, (४) जहां द्वितीय तृतीय पाद में समानता हो उसे गर्भ, (५) जहां द्वितीय और चतुर्थपादमें समानता हो उसे संदष्टक, (६) जहां तृतीय और चतुर्थपादमें समानता हो उसे पुच्छ, (७) जहां चारों चरण एक समान हों उसे पंक्ति, (८) जहां प्रथम और चतुर्थ तथा द्वितीय और तृतीय पाद एक समान हों उसे परिवृत्ति, (६) जहां प्रथम और द्वितीय तथा तृतीय और चतुर्थ पाद एक समान हों उसे युग्मक, (१०) जहां श्लोक का पूर्वार्ध और अपरार्ध एक समान हो उसे समुद्गक और (११) जहां एक ही श्लोक दो बार पढ़ा जाता है उसे महायमक अथवा श्लोकयमक कहते हैं । जैसे इस पुस्तकके ५वें श्लोकमें 'संदष्टक' यमक, १५वें श्लोकमें 'युग्मक' यमक २५वें और ५२वेंश्लोकमें 'समुद्गक' यमक, ११-१२ वें, १६-१७ वें, ३७-३८वें, ४६-४७ वें, ७६-७७वें, और १०६-१०७ वें श्लोकोंमें महायमक (श्लोकयमक) है । ये ११ भेद श्लोक, श्लोकार्ध, और पादकी आवृत्तिकी अपेक्षासे किये गये हैं । पादांश, पदांश, और वर्णोंकी आवृत्तिकी अपेक्षा अनेक भेद हो जाते हैं । देखो, निर्णयसागर बम्बईसे प्रकाशित साहित्यदर्पणकी टिप्पणी । यमकालंकारके भेद-प्रभेदोंका विशेष वर्णन सरस्वती कण्ठाभरण आदि आकरग्रन्थों में देखना चाहिये ।

१ दिवि भवैर्दिव्यैः पक्षे दिवि गगने+ऐः-गतवान् इति पदच्छेदः । ऐः इण् गताविति धातोर्लङि मध्यमपुरुषस्यैकवचने रूपम् । अत्र 'ऐः' इति क्रिया गुप्ता ।

नतपीलेति । प्रथमपादस्य पञ्चाक्षराणि अभ्यस्तानि पुनरुच्चारितानि द्वितीयपादश्च समस्तः पुनरुच्चारितः । नतानां प्रणतानां पीला व्याधयः डो लो वा इति लत्वन्ताः अस्यतीति नतपीलासनः । तस्य सम्बोधनं हे नतपीलासन । न विद्यते शोको यस्यासावशोकः तस्य सम्बोधनं हे अशोक । शोभनं मनोविज्ञानं यस्य सः सुमनाः तस्य सम्बोधनं हे सुमनः अव रक्ष अथवा वा समुच्चये द्रष्टव्यः। हे ऋषभ आदितीर्थकर । आसितः स्थितः सन् । भामण्डलं प्रभामण्डलं, आसनं सिंहासनं, अशोकः अशोक-वृक्षः, सुमनसः पुष्पाणि तेषां वर्षं सुमनोवर्षं पुष्पवृष्टिरित्यर्थः, तेषां द्वन्द्वः तैर्भासितः शोभितः भामण्डलासनाशोकसुमनोवर्षभासितः सन् । किमुक्तं भवति—हे ऋषभ अव इत्यादि अथवा हे भटारक यदा त्वं स्थितः तदा एवं विधः सन् स्थितगतश्च त्वं यदा तदा एवंप्रकारैर्गतः । वक्ष्यमाणश्लोकेन सह सम्बन्धः ॥४॥

दिव्यैरिति । क्रिया पुनः तृतीयपादे गुप्ता दिव्यैरित्यत्र । अथवा मुरजबन्ध एवं द्रष्टव्यः तद्यथा—चतुरोपि पादानधोधो व्यवस्थाप्य प्रथम-पादस्य प्रथमाक्षरेण तृतीयपादस्य द्वितीयाक्षरं, तृतीयपादस्य प्रथमाक्षरं प्रथमपादस्य द्वितीयाक्षरेण सह गृहीत्वा एवं नेतव्यं यावत्परिसमाप्तिः । पुनर्द्वितीयपादस्य प्रथमाक्षरं चतुर्थपादस्य द्वितीयाक्षरेण, चतुर्थपादस्य प्रथमाक्षरेण सह द्वितीयपादस्य द्वितीयाक्षरं च गृहीत्वा पुनरनेन विधा-नेन तावन्नेतव्यं यावत्परिसमाप्तिर्भवति । ततो मुरजबन्धः स्यात् ।

दिवि भवानि दिव्यानि अतस्तैर्दिव्यः द्वन्द्वं कृत्वा ध्वनिसितछत्र-चामरैः पुनरपि दुन्दुभिस्वनैः दिव्यैरिति प्रत्येकं समाप्यते । दिवि आकाशे ऐः गतवान् इण् गतावित्यस्य धोः लङन्तस्य रूपम् । विनिर्मितानि कृतानि स्तोत्राणि स्तवनानि विनिर्मितस्तोत्राणि तेषु । श्रमः अभ्यासः । नानाप्रकारेण मधुररवेण (स्वरेण) कृतस्तवनमित्यर्थः विनिर्मितस्तोत्रश्रमः स एव दर्दुरः वाद्यविशेषः विनिर्मितस्तोत्रश्रमदर्दुरः । स येषामस्ति ते

विनिर्मितश्रमस्तोत्रदर्दुरिणः । तैः सह अथवा विनिर्मितस्तोत्रश्रमेण दर्दुरिणोतस्तैः सह जनैः समवसृतिप्रजाभिरित्यर्थः । किमुक्तं भवति—चतुर्णिकायदेवेन्द्रचक्रधरबलदेववासुदेवप्रभृतिभिः सह गतः स्थितश्च भवान्, ततो भवानेव परमात्मा एतदुक्तं भवति ॥६॥

अर्थ—हे ऋषभदेव ! आप नम्र मनुष्योंकी सांसरिक व्यथाओंको हरने वाले हैं, शोकरहित हैं, आपका हृदय उत्तम है—लोककल्याणकारक भावनासे पूर्ण है । हे प्रभो ! आप भामण्डल, सिंहासन, अशोकवृक्ष, पुष्पवृष्टि, मनोहर दिव्यध्वनि, श्वेतच्छत्र, चमर और दुन्दुभिनिनादसे शोभित होकर, अनेक स्तोत्रोंमें श्रम करनेवाले—मधुरध्वनिसे अनेक स्तुति करने वाले—तथा दर्दुर आदि वाद्योंसे सहित दिव्यजनोंके —देवेन्द्र विद्याधर चक्रवर्ती आदिके—साथ (समवसरणभूमिमें) आसीन—(स्थित) हुए थे और उन्हीं के साथ आपने आकाश-विहार किया था ॥

भवार्थ—जब भगवान् समवसरण-भूमिमें विराजमान होते हैं तब उनके तीर्थंकर नामकर्मके उदयके फलस्वरूप अष्ट प्रातिहार्यरूप विभूति प्रकट होती है वे उससे अत्यन्त शोभायमान होते हैं । समवसरणमें बैठे हुए देव विद्याधर आदि भव्यजीव तरह-तरहके बाजे बजाते हुए मनोहर शब्दोंसे उनकी स्तुति करते हैं । तथा जब भगवान्का आकाश-मार्गसे विहार होता है तब भी प्रातिहार्यरूप विभूति और अनेक उत्तम जन उनके साथ रहते हैं । इन सब बातोंसे आचार्य समन्तभद्रने भगवान् ऋषभदेवका अलौकिक प्रभाव प्रकट किया है ॥५,६॥

(मुरजबन्धः)

यतः श्रितोपि कान्ताभिर्दृष्टा[1] गुरुतया स्ववान् ।
वीतचेतोविकाराभिः स्रष्टा चारुधियां भवान् ॥७॥

यतः श्रितः इति । यतः यस्मात् श्रितोपि आश्रितोपि सेवितोपि कान्ताभिः स्त्रीभिः वानव्यन्तररादिरमणीभिः । तथापि दृष्टा प्रेक्षिता गुरुतया गुरुत्वेन गुरोर्भावः गुरुता तया । स्ववान् आत्मवान् ज्ञानवानित्यर्थः । किं विशिष्टाभिः स्त्रीभिः वीतचेतोविकाराभिः वीतः विनष्टः चेतसः चित्तस्य विकारः कामाभिलाषः यासां ताः वीतचेतोविकाराः ताभिः वीतचेतोविकाराभिः । स्रष्टा विधाता । चार्व्यश्च ताः धियश्च चारुधियः अतस्तासां चारुधियां शोभनबुद्धीनां । भवान् भट्टारकः । किमुक्तं भवति--समवसृतिस्थस्त्रीजनसेवितोपि गुरुत्वेन ईक्षितासि यतस्ततः शोभनबुद्धीनां सृष्टा कर्त्ता भवानेव एतदुक्तं भवति ॥ ७ ॥

अर्थ--हे प्रभो ! यद्यपि आप समवसरणमें अनेक निर्विकार—कामेच्छासे रहित—सुन्दर देवियोंके द्वारा सेवित होते हैं—बहुत देवियां आपकी उपासना करती हैं—तथापि आत्मवान्–जितेन्द्रिय होनेके कारण आप महान्—पूज्य ही माने जाते हैं; अतः निर्मल बुद्धिके उत्पन्न करनेवाले विधाता आप ही हो।

[1] 'दृष्टा' यहां पर कर्तृवाच्य में 'तृच्' प्रत्यय हुआ है और 'गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे' इस कोश-वाक्यसे गुरु शब्दका पिता अर्थ भी स्पष्ट है। यदि श्लोक में 'ताः' इस कर्म पदका ऊपरसे सम्बन्ध कर लिया जावे तो श्लोकका एक अर्थ यह भी हो सकता है—'हे प्रभो ! आप अनेक सुन्दर स्त्रियोंके द्वारा सेवित होनेपर भी उन्हें पितृभावसे देखते हैं अर्थात् जिस प्रकार पुत्रोंके प्रति पिताकी दृष्टि विकार—रहित होती है उसी तरह उनके प्रति भी आपकी दृष्टि विकार-रहित होती है; क्योंकि आप स्ववान् हैं – जितेन्द्रिय अथवा ज्ञानवान् हैं। और इसलिये उत्तम बुद्धिके उत्पादक आप ही माने जा सकते हैं।'

भावार्थ—यद्यपि लोकमें स्त्रियोंका सम्पर्क प्रायः मानवकी प्रतिष्ठाको कम करनेवाला माना गया है तथापि उसमें आपकी प्रतिष्ठामें कुछ भी कमी नहीं आती। क्योंकि जो स्त्रियां आपकी उपासना करती हैं वे स्वयं उस समय विकार-रहित होती हैं और आप आत्मवशी-ज्ञानवान् होनेके कारण विकार-रहित हैं ही। ऐसी अवस्थामें यदि स्त्रियां मनोहर स्तोत्रोंसे आपकी 'भक्ति' करती हैं तो वह कुछ भी असमंजस प्रतीत नहीं होता ॥ ७ ॥

(मुरजबन्धः)

विश्वमेको रुचामाऽऽको व्यापो येनार्य्य ! वर्त्तते ।
शश्वल्लोकोऽपि चाऽलोको द्वीपो ज्ञानार्णवस्य ते ॥८॥

विश्वमेक इति। विश्वं समस्तं क्रियाविशेषणमेतत्। एकः अद्वितीयः। रुचां दीप्तानां आकः प्रापकः। कर्मणि तयं। व्यापः व्यापकः। येन यस्मात्। हेतौ भा। हे आर्य भट्टारक! वर्त्तते शश्वत् सर्वदा। लोकः द्रव्याधारः शश्वल्लोकः। अपि च अन्यच्च। अलोकोपि अलोकाकाशमपि। द्वीपः समुद्रे जलविरहितः प्रदेशः। ज्ञानं केवलज्ञानम्। अर्णवः समुद्रः। ज्ञानमेवार्णवः ज्ञानार्णवः तस्य ज्ञानार्णवस्य। ते तव। अथवा लोकस्यैव विशेषणम्। रुग्भिः ज्ञानैः आकः परिच्छेद्यः व्यापः मेयः। येन कारणेन लोकश्चालोकश्च आको व्यापश्च ज्ञानार्णवस्य ते तव तेन कारणेन द्वीपो वर्त्तते इति। किमुक्तं भवति—सर्वपदार्थेभ्यः केवलज्ञानस्यैव माहात्म्यं दत्तं भवति ॥ ८ ॥

अर्थ—हे आर्य ! यह समस्त लोक और अलोक आपके केवलज्ञानका ही ज्ञेय है—आपका केवलज्ञान लोकवर्ति समस्त पदार्थों और अलोकाकाश को जानता है—अतः वह आपके ज्ञानरूप समुद्रका एक द्वीप है।

भवार्थ—जिस प्रकार विस्तृत समुद्रके भीतर द्वीप होता है

उसी प्रकार आपके ज्ञानके भीतर लोक-अलोक हैं। द्वीपकी अपेक्षा समुद्रका विस्तार जैसे बहुत बड़ा होता है वैसे ही लोक-अलोककी अपेक्षा आपके ज्ञानका विस्तार बहुत अधिक है। पदार्थ अनन्त अवश्य हैं, परन्तु वे आपके अनन्त-ज्ञानकी अपेक्षा अल्प हैं। अनन्तके भी अनन्त भेद होते हैं ॥८॥

(मुरजबन्धः)

श्रितः श्रेयोऽप्युदासीने यत्त्वय्येवाऽश्नुते परः।
क्षतं भूयो मदाहाने तत्त्वमेवार्चितेश्वरः ॥९॥

श्रितः श्रेय इति। श्रितः आश्रितः। श्रेयोपि पुण्यमपि। उदासीने मध्यस्थे। अत्रापि शब्दः सम्बन्धनीयः। यत् यस्मात्। त्वयि युष्मदः ईबन्तस्य प्रयोगः। भट्टारके एव नान्यत्रेत्यर्थः। अश्नुते प्राप्नोति। परः जीवः। क्षतं विवरं छिद्रं दुःखम्। भूयः पुनरपि। मदस्य अहानं यस्मिन् स मदाहानः तस्मिन् मदाहाने। मदः रागविशेषः। अहानं अपरित्यागः। तत् तस्मात्। त्वमेव भवानेव। अर्चितः पूजितः। ईश्वरः प्रधानः स्वामी। एतदुक्तं भवति—भट्टारके उदासीनेपि आश्रितः जीवः अश्नुते श्रेयः सरागे त्वद्व्यतिरिक्तेऽन्यत्र राजादिके जने पुनराश्रितः क्षतं दुःखमेव प्राप्नोति। तस्माद् भट्टारक एव अर्चितेश्वरः[1] नान्यः ॥९॥

अर्थ—हे प्रभो! यद्यपि आप उदासीन हैं—रागद्वेषसे रहित हैं—तथापि आपकी सेवा करनेवाले—विशुद्ध चित्तसे आपका ध्यान करनेवाले—पुरुष कल्याणको ही प्राप्त होते हैं और अहंकारसे पूर्ण अथवा रागद्वेषसे पूर्ण अन्य कुदेवादिककी सेवा करनेवाले पुरुष अकल्याणको प्राप्त होते हैं। अतः आप ही पूज्य ईश्वर हैं।

भावार्थ—जो निर्मल भावोंसे आपकी स्तुति करता है उसे शुभ कर्मोंका आस्रव होनेके कारण अनेक मंगल प्राप्त होते हैं और जो

1 अर्चितश्चासावीश्वरश्च अर्चितेश्वरः।

कलुषित भावोंसे आपकी निन्दा कर अन्य देव या राजा महाराजाकी सेवा करता है उसे अशुभास्रव होनेसे अनेक अमंगल एवं दुःख प्राप्त होते हैं जब कि आप स्तुति और निन्दा करनेवाले दोनोंपर ही एकसमान दृष्टि रखते हैं–एक को अच्छा तथा दूसरे को बुरा नहीं मानते।[१]

(गतप्रत्यागतार्द्धः[२])

भासते विभुताऽस्तोना ना स्तोता भुवि ते सभाः।
याः श्रिताः स्तुत ! गीत्या नु नुत्या गीतस्तुताः श्रिया[३] ॥१०॥

भासते इति। अस्य श्लोकस्यार्द्धं पंक्त्याकारेण विलिख्य क्रमेण

१ सुहृत्त्वयि श्रीसुभगत्वमश्नुते द्विषंस्त्वयि प्रत्ययवत्प्रलीयते।
भवानुदासीनतमस्तयोरपि प्रभो ! परं चित्रमिदं तवेहितम्॥६९॥
—बृहत्स्वयंभूस्तोत्र।

'उपैति भक्त्या सुमुखः सुखानि त्वयि स्वभावाद्विमुखश्च दुःखम्।
सदावदातद्युतिरेकरूपस्तयोस्त्वमादर्श इवावभासि ॥७॥
—विषापहारस्तोत्र।

२ श्लोकके अर्ध भागको पंक्त्याकारसे लिखकर क्रमपूर्वक पढ़ना चाहिये। इस अलंकारमें विशेषता यह है कि क्रम से पढ़नेमें जो अक्षर आते हैं वे ही अक्षर विपरीत क्रम—दूसरी तरफसे पढ़ने में भी आते हैं। इसी प्रकार श्लोकके उत्तरार्ध भागको भी लिख कर पढ़ना चाहिये। यहां यह गतप्रत्यागत विधि अर्धश्लोकमें है इसलिये इसे गतप्रत्यागतार्धअलंकार कहते हैं। जहां सम्पूर्ण श्लोक में गतप्रत्यागत विधि होती है वहां गतप्रत्यागत अथवा अनुलोम-प्रतिलोम अलंकार कहलाता है। कहीं कहीं गत-प्रत्यागतविधि श्लोकके एक एक पादमें भी होती है।

३ 'नाऽनुस्वार विसर्गौ च चित्रभङ्गाय संमतौ'। अर्थात् अनुस्वार और विसर्गकी हीनाधिकतासे चित्रालङ्कार भग्न नहीं होता।

पठनीयम्। क्रमपाठे यान्यक्षराणि विपरीतपाठेऽपि तान्येवाक्षराणि यतस्ततो गतप्रत्यागतार्द्धः। एवं द्वितीयार्द्धमपि योज्यम्। एवं सर्वत्र गतप्रत्यागतार्द्धश्लोकाः द्रष्टव्याः।

भासते शोभते। विभोर्भावः विभुता स्वामित्वम्। तया। अस्ताः क्षिप्ताः ऊनाः न्यूनाः यकाभिः ता विभुतास्तोनाः। ना पुरुषः। स्तोता स्तुतेः कर्त्ता। भुवि लोके। ते तव। सभाः समवसृतीः, शसन्ताः द्रष्टव्याः। याः यद्‌ः टाबन्तस्य प्रयोगः। श्रिताः आश्रिताः। हे स्तुत पूजित। गीत्या गेयेन। नु वितर्के। नुत्या स्तवेन गीताश्च ताः स्तुताश्च गीतस्तुताः। श्रिया लक्ष्म्या। श्रिता आश्रिताः याः सभाः गीत्या गीताः नुत्या स्तुताः संजाताः ना स्तोता पुरुषः भासते ॥१०॥

अर्थ—हे स्तुत! आपकी स्तुति करनेवाला पुरुष पृथ्वी पर उन समवसरण-सभाओंको पाकर अत्यन्त शोभित होता है जो सभाएं अष्ट महाप्रातिहार्यरूप लक्ष्मीसे शोभित हैं, संगीतमय स्तोत्रोंसे जिनका वर्णन किया जाता है, श्रेष्ठ पुरुषोंके नमस्कारसे जो पूज्य हैं और जिन्होंने अपने वैभवसे अन्य सभाओंको तिरस्कृत कर दिया है।

भावार्थ—आपके स्तवन करनेसे मनुष्य तीर्थङ्कर होता है, जिससे वह भी समवशरण सभाको पाकर आपके ही समान शोभित होता है। यह बात किसी अन्य आराध्यकी आराधनासे नहीं हो सकती; क्योंकि तीर्थङ्कर प्रकृतिका आस्रव केवली या श्रुतकेवलीके सम्पर्कमें रहनेसे ही होता है ॥१०॥

(श्लोकयमक)

स्वयं शमयितुं नाशं विदित्वा सन्नतस्तु ते।
चिराय भवते पीड्यमहोरुगुरवेऽशुचे ॥११॥
स्वयं शमयितुं नाशं विदित्वा सन्नतः स्तुते।
चिराय भवतेपीड्य महोरुगुरवे शुचे ॥१२॥

(युग्मं)

स्वयं शमेति—द्वौ श्लोकावेतौ पृथगर्थौ द्रष्टव्यौ।

स्वयं स्वतः। शमयितुं विनाशयितुम्। नाशं विनाशम् कर्म। विदित्वा ज्ञात्वा उपलभ्य। सन्नतः सम्यग् नतः प्रणतः। तु अत्यर्थम्। ते तुभ्यम्। चिराय नित्याय अक्षयपदनिमित्तं वा। भवते प्रभवते। भू सत्तायामित्यस्य धोः णवन्तस्य अवन्तस्य प्रयोगः। पीड्यं सविघातम्, न पीड्यं अपीड्यम्, महः तेजः, अपीड्यं च तन्महश्च तदपीड्यमहः, अपीड्यमहसः रुक् अपीड्यमहोरुक्, तया उरुः महान् अपीड्यमहोरुगुरुः तस्मै अपीड्यमहोरुगुरवे अथवा अपीड्यमहाँश्च रुगुरुश्चासौ अपीड्यमहोरुगुरुः तस्मै अपीड्यमहोरुगुरवे। शुक् शोकः, न शुक् अशुक् तस्मै अशुचे। अशोकार्थं भवते तेन सम्बन्धः तदर्थे अविर्यं द्रष्टव्या। अन्यत् सुगमम्। उत्तरश्लोके स्थितं क्रियापदमपेक्षते ॥११॥

स्वयमिति—अयः पुण्यम् शोभनः अयः स्वयः तं स्वयम्। शं सुखम्। अयितुं गन्तुम्। ना पुरुषः जीवः। अशं दुःखम्। विद् ज्ञानवान् अथवा विचारवान्। इत्वा गत्वा। सन् विद्यमानः। अतः अस्मात् कारणात्। स्तुते स्तुतिविषये। चिराय चिरेण अनन्तकालेन। अथवा अचिरेण तत्क्षणात्। क्षि संज्ञकोयम्। भवते प्राप्नुते। भू प्राप्ताविन्यस्य धोः आदषाद्[1] इति अणिजन्तस्यापि प्रयोगो भवति। अपि सम्भावने। हे ईड्य पूज्य। महती उर्वी गौः वाणी यस्यासौ महोरुगुः, महोरुगुरेव रविः महोरुगुरविः, तस्य सम्बोधनं हे महोरुगुरवे। शुचे शुद्धे सर्वकर्मनिर्मुक्ते। एतदुक्तं भवति—तुभ्यं अशोकार्थं भवते अप्रतिहतकेवलज्ञानदीप्तये आत्मना सन्नतः ना पुरुषः प्रेक्षापूर्वकारी विनाशं विनाशयितुं मोक्षार्थं सुखं गन्तुं हे ईड्य महोरुगुरवे दुःखं गत्वा पुण्यमपि प्राप्नुते ॥१२॥

अर्थ—हे स्तुत्य ! हे दिव्यध्वनिरूप किरणोंसे शोभायमान सूर्य ! जो ज्ञानवान पुरुष, विनाशको नष्ट करनेके लिये—अजर-

---

[1] आत्मनेपदस्य।

अमर पद पानेके उद्देश्यसे, अविनाशी—शोकरहित एवं निर्बाध-प्रताप और केवलज्ञानसे सम्पन्न आपकेलिये सम्यक्प्रकार शुद्ध भावोंसे नमस्कार करता है तथा सब कर्मोंको नष्ट करने वाले आपके स्तवनमें तल्लीन होता है वह दुःखोंको पाकर भी अन्तमें पुण्यस्वरूप-अविनाशी परमसुखको प्राप्त होता है।

भावार्थ—जो पुरुष भक्तिपूर्वक आपको नमस्कार करता है वह समस्त कष्टोंको बिता कर अन्तमें जन्म-मरणके कष्टको भी दूर कर अविनाशी मोक्ष-पदको प्राप्त होता है॥११ १२॥

(प्रथमपादोद्भूतपश्चार्द्धकाक्षरविरचितश्लोकः[1])

ततोतिता तु तेतीतस्तोतृतोतीतितोतृतः ।
ततोऽतातिततोतोते ततता ते ततोततः ॥१३॥

ततोतीति—प्रथमपादे यान्यक्षराणि तानि सर्वाण्यक्षराणि पश्चिमार्द्धे यत्र तत्र व्यवस्थितानि, नान्यानि सन्ति।

तता विस्तीर्णा ऊतिः रक्षा तता चासावूतिश्च ततोतिः तस्या भावः ततोतिता। तु विशेषे। अति पूजायां वर्त्तमानो कि गि ति संज्ञां न भवति, अतएव केवलस्यापि प्रयोगः। किमुक्तं भवति—विशिष्ट-पूजितप्रतिपालनत्वम्। ते तव युष्मदः प्रयोगः। इतः इदमः प्रयोग एभ्य इत्यर्थः। केभ्यः तोतृतोतीतितोतृतः। अस्य विवरणं—तोतृता ज्ञातृता, कुतः तु गतौ सौत्रिकोयं धुः सर्वे गत्यर्था ज्ञानार्थे वर्त्तन्ते इति। ऊतिः रक्षा वृद्धिर्वा अव रक्षणे इत्यस्य धोः क्त्यन्तस्य प्रयोगः। तोतृताया ऊतिः तोतृतोतिः इति अवगमः प्राप्तिर्वा इण गतावित्यस्य धोः क्त्यन्तस्य प्रयोगः। तोतृतोतेः

१ इस श्लोकके प्रथम पादमें जो अक्षर हैं वे ही सब अक्षर आगेके पादोंमें जहाँ-तहाँ व्यवस्थित हैं। अन्य अक्षर नहीं हैं। श्लोककी रचना मात्र 'तकार' व्यञ्जन अक्षरमें हुई है अतः यहां एक व्यञ्जन-चित्र अलंकार है।

इति: तोतृतोतीति: ज्ञातृत्ववृद्धिप्रापणमित्यर्थ: । अथवा ज्ञातृत्वरक्षण-विज्ञानमिति वा । तुदन्तीति तोतृणि तुद् प्रेरणे इत्यस्य धो: प्रयोग: तोतृतीतीनि: तोतृणी । तोतृतोतीति तोतृणि ज्ञानावरणादीनीत्यर्थ: । तेभ्य: तोतृतोतीतितोतृत: । तत: तस्मात् । ताति: परिग्रह: परायत्तत्वम् । दृश्यते चायं लोके प्रयोग: युष्मत्तात्या वयं वसाम: युष्मत्परिग्रहेणेत्यर्थ: । न ताति: अताति: अतात्या तता विस्तीर्णा: अतातितता: अपरिग्रहेण महान्तो जाता इत्यर्थ: । अनातिततेपु उता बद्धा ऊति: रक्षा यस्य स आतातिततोतीति: तस्य सम्बोधनं हे अतातिततोतोते । ततता विशालता प्रभुता त्रिलोकेशत्वमित्यर्थ: । ते तव । ततं विशालं विस्तीर्णं उतं बन्ध: ज्ञानावरणादीनां संश्लेष: । ततं च तदुतं च ततोतम् । तत् तस्यतीति ततोतता: तस्य सम्बोधनं हे ततोतत: ॥१३॥

अर्थ—हे भगवान ! आपने, विज्ञानवृद्धिकी प्राप्तिको रोकने वाले इन ज्ञानावरणादि कर्मोंसे अपनी विशेष रक्षा की है— ज्ञानावरणादि कर्मोंको नष्ट कर केवलज्ञानादि विशेष गुणोंको प्राप्त किया है । तथा आप परिग्रहरहित—स्वतन्त्र हैं । इसलिये पूज्य और सुरक्षित हैं । एवं आपने ज्ञानावरणादि कर्मोंके विस्तृत—अनादिकालिक सम्बन्धको नष्ट कर दिया है अत: आपकी विशालता-प्रभुता स्पष्ट है—आप तीनों लोकोंके स्वामी हैं ॥ १३ ॥

(एकाक्षरविरचितैकैकपाद: श्लोक:[१])

येयायायाययेयाय नानानूनाननानन ।
ममाममाममामामिताततीतिततीतित: ॥१४॥

येयेति—येय: प्राप्य: अय: पुण्यम् यै: ते येयाया: । आय: प्राप्त: अय: सुखं येषां ते आयाया:, येयायाश्च आयायाश्च येयायायाया: तै: येय: प्राप्य: अय: मार्गो यस्यासौ येयायायाययेयाय: तस्य सम्बोधनं हे

१ इस श्लोकका प्रत्येक पाद एक-एक व्यञ्जन अक्षरसे बना है ।

येयायायायायेयाय। नाना अनेकं, अनूनं सम्पूर्णं, नाना च अनूनं च नानानूने। आननं मुखकमलम्, अननं केवलज्ञानम्, आननं च अननं च आननानने। नानानूने आनननानने यस्यासौ नानानूनानननानन: तस्य सम्बोधनं हे नानानूनानननानन। मम अस्मद: प्रयोग:। मम: मोह: दृश्यते च लोके प्रयोग: काम: क्रोध: ममत्वमिति। न विद्यते ममो यस्यासौ अमम: तस्य सम्बोधनं हे अमम। आमो व्याधिस्तम्। आम क्रियापदम्। आम रोगे इत्यस्य धो: रूपम्, आमं आम। न मिता अमिता अपरिमिता। आतति: महत्वं। अमिता आततिर्यासां ता: अमितातनय:, ईतय: व्याधय:, अमितातनयश्च ता: ईतयश्च अमितातनतीतय:, तासां तति: संहति: अमितातनतीतितति:। इति: गमनं प्रसर:। अमितातनतीतिततेः इति: अमितातनतीतिततीति:। तां तस्यतीति अमितातनतीतिततीतिता:। तस्य सम्बोधनं हे अमितातनतीतिततीतित:। किमुक्तं भवति—हे एवंगुणविशिष्ट मम आमं रोगं आम विनाशय ॥१४॥

अर्थ—हे भगवन्! आपका यह मोक्षमार्ग उन्हीं जीवोंको प्राप्त हो सकता है जो कि पुण्यबन्धके सन्मुख हैं अथवा जिन्होंने पहले पुण्यबन्ध कर लिया है। समवसरणमें आपके चार मुख दिखाई देते हैं, आपका केवलज्ञान भी पूर्ण है—संसारके सब पदार्थोंको एक साथ जानता है। यद्यपि आप ममताभावसे-मोहपरिणामोंसे-रहित हैं तथापि संसार सम्बन्धी अनेक बड़ी-बड़ी व्याधियोंको नष्ट कर देते हैं। हे प्रभो! मेरे भी जन्म-मरणरूप रोगको नष्ट कर दीजिये ॥ १४ ॥

(पादाभ्यासमस्तपादान्तयमक:, युग्मकयमक:)

गायतो महिमायते गा यतो महिमाय ते।
पद्मया स हि तायते पद्मयासहितायते ॥१५॥

गायतो मेति—यादृग्भूत: प्रथम: पाद: तादृग्भूतो द्वितीयोपि।

यादग्भूतस्तृतीयः तादृशश्चतुर्थोऽपि अयते इति सर्वपादेषु समानं यतः अतो भवति पादाभ्यासमसर्वपादान्तयमकः ।

गायतः स्तुतिं कुर्वतः । कै गै रै शब्दे इत्यस्य धोः शत्रन्तस्य प्रयोगः । महिमा माहात्म्यम् । अयते गच्छति । गाः वाणीः, गो इत्यस्य शसन्तस्य रूपम् । यतः यस्मात् । महिमानं अयते महिम्नायते स्म वा महिमायः तस्य सम्बोधनं हे महिमाय । ते तव । पद पादः । दृश्यते च पच्छब्दस्य लोके प्रयोगः गाः पदा न स्पृष्टव्या । मया अस्मदः भान्तस्य प्रयोगः । सः तदः वान्तस्य रूपम् । हि निपातोऽयं स्फुटार्थे । तायते विस्तार्यते । तस्य पादस्य गुणाः विस्तार्यन्ते तेषां विस्तारे सति पादस्यापि विस्तारः कृतः । गुणगुणिनोरभेदः । पद्मया लक्ष्म्या सहिता आयतिः शरीरायामः यस्यासौ पद्मयासहितायतिः गमकत्वात्समासविधिः । यथा देव-दत्तस्य गुरुकुलम् । यथायं गुरुशब्दोऽन्यमपेक्षते एवं सहित शब्दोऽपि । अथवा पद्मेषु यातीति पद्मयाः । सह हितेन वर्त्तत इति सहिता । आयतिः आज्ञा । सहिता आयतिर्यस्यासौ सहितायतिः पद्मयाश्चासौ सहितायतिश्च पद्मयासहितायतिः । तस्य सम्बोधनं हे पद्मयासहितायते । किमुक्तं भवति—हे महिमाय पद्मया सहितायते ते पदं गायतः महिमा[१] अयते गाः यतः ततो मया स हि पद तायते विस्तार्यते स्तूयते इत्यर्थः ॥१५॥

अर्थ—हे भगवन् ! आप स्वयं माहात्म्यको प्राप्त हैं, आपका शरीर भी लक्ष्मीसे—अनुपम सौन्दर्यसे—सहित है । अथवा आप कमलोंपर विहार करते हैं—विहार करते समय देव लोग आपके चरणोंके नीचे कमलोंकी रचना करते हैं—और आपकी आज्ञा भव्यजीवोंका हित करने वाली है । हे प्रभो ! जो आपका गुणगान करता है उसकी वाणीको महत्त्व प्राप्त होता है—

१ महिमा गाः अयते इत्यनेन महिम्नः स्तुतिविषयत्वमुक्तम् ।

उसकी वाणी अनेक अतिशयोंसे पूर्ण होती है—अतः मैं भी आपके चरणकमलोंको—उनके गुणोंको—विस्तृत करता हूँ—उनकी स्तुति करता हूँ।

भावार्थ—जिनेन्द्रदेवके चरणकमलोंकी स्तुति करनेसे पुरुषके वचनोंमें वह शक्ति निहित होती है जिससे वह सर्वोपकारी उपदेश देनेमें—दिव्यध्वनि खिरानेमें—समर्थ होता है अतः आचार्य समन्तभद्र भी भगवान वृषभनाथके चरणोंकी स्तुति करनेमें प्रवृत्त हुए हैं ॥ १५ ॥

अजित-जिन-स्तुतिः

(श्लोकयमकः)

[1]सदक्षराजराजित प्रभो दयस्व वर्द्धनः।
सतां तमो हरन् जयन् महो दयापराजितः ॥१६॥

सदिति—सत् शोभनम्। अक्षर अनश्वर। न विद्यते जरा वृद्धत्वं यस्यासावजरः तस्य सम्बोधनं हे अजर। अजित द्वितीयतीर्थकरस्य नाम। प्रभो स्वामिन्। दयस्व-दय दाने इत्यस्य धोः लोडन्तस्य रूपम्। वर्द्धनः नन्दनः त्वं यतः। सतां भव्यलोकानाम्। तमः अज्ञानम्। हरन् नाशयन्। जयन् जयं कुर्वन् इत्यर्थः। महः तेजः केवलज्ञानम्, दयस्व इत्यनेन सम्बन्धः। दयापर दयाप्रधान। न जितः अजितः। किमुक्तं भवति—अन्ये सर्वे जिताः त्वमजितः अतः हे अजित भट्टारक महः सद्ज्ञानं दयस्व ॥१६॥

अर्थ—उत्तम अविनाशी और जरा रहित हे अजितनाथ प्रभो! आप क्षमा आदि गुणोंसे वर्धमान हैं, साधुपुरुषोंके अज्ञानअन्धकारको नष्ट करनेवाले हैं, विजयी हैं और काम-क्रोध आदि शत्रुओंसे अजित हैं—काम-क्रोध आदि दोषोंसे

---

[1] प्रमाणिका छन्दः 'प्रमाणिका जरौ लगौ' इति लक्षणात्।

रहित हैं। हे दयालु देव ! वह दिव्य तेज—केवलज्ञान—मुझे भी दीजिये (जिसके प्रतापसे आप परमपूज्य उत्कृष्ट अवस्थाको प्राप्त हुए हो) ॥ १६ ॥

सदक्षराजराजित प्रभोदय स्ववर्द्धनः ।
स तान्तमोह रंजयन महोदयापराजितः ॥१७॥

सदक्षेति—सह दक्षैं विचक्षणैः सह वर्त्तन्त इति सदक्षाः । सदक्षाश्च ते राजानश्च सदक्षराजानः तैः राजितः शोभितः सदक्षराजराजितः तस्य सम्बोधनं हे सदक्षराजराजित । प्रभायाः विज्ञानस्य उदयो वृद्धिर्यस्यासौ प्रभोदयस्तस्य सम्बोधनं हे प्रभोदय । स्वेषां स्वानां वा वर्द्धनः नन्दनः स्ववर्द्धनस्त्वम् । अथवा स्ववर्द्धनः अस्माकम् । स एवं विशिष्टस्त्वं । तान्तः विनष्टः मोहः मोहनीयकर्म यस्यासौ तान्तमोहः तस्य सम्बोधनं भो तान्तमोह । रंजयन् अनुरागं कुर्वन् इत्यर्थः । महान् पृथुः पूज्यः उदयः उद्भूतिर्येषां ते महोदयाः देवेन्द्रचक्रेश्वरादयः । अपरान् अन्तःशत्रून् मोहादीन् आसमन्तात् जयंतीति कर्त्तरि क्विप् अपराजितः । महोदयाश्च ते अपराजितश्च ते महोदयापराजितः । अथवा द्वन्द्वः समासः तान् महोदयापराजितः कर्मणि इपो बहुत्वम् । समुदायार्थः—हे अजित भट्टारक सदक्षराजराजित प्रभोदय स्ववर्द्धनः त्वं सः तान्तमोह रञ्जयन् महोदयापराजितः महः दयस्व ॥१७॥

अर्थ—समर्थ अथवा चतुर राजाओंसे शोभित ! केवलज्ञानसे सहित ! और मोह-विकारसे शून्य ! हे अजित देव ! आप आत्मीय जनोंको बढ़ाने वाले हैं—उन्नत पदपर पहुँचाने वाले हैं—और महान् ऐश्वर्यसे सहित इन्द्र चक्रवर्ती आदि तथा काम-क्रोध आदि अन्तरङ्ग शत्रुओंको जीतने वाले बड़े-बड़े मुनियोंको अनुरञ्जित-आनन्दित करते हैं। हे प्रभो ! वह सम्यग्ज्ञान मुझे भी दीजिये जिसके प्रसादसे आप इस उत्कृष्ट दशाको

प्राप्त हुए हो¹ ॥१७॥

शम्भव-जिन-स्तुतिः

(अर्द्ध भ्रमः)

नचेनो न च रागादिचेष्टा वा यस्य पापगा ।
नो वामैः श्रीयतेऽपारा नयश्रीर्भुवि यस्य च ॥ १८ ॥
पूतस्वनवमाचारं तन्वायातं भयाद्रुचा ।
स्वया वामेश पाया मा नतमेकार्च्य शंभव ॥१९॥

(युग्मं)

नचेन इति—नच प्रतिषेधवचनम् । इनः स्वामी । नच प्रतिषेधे । रागः आदिर्येषां ते रागादयः तेषां चेष्टा कायव्यापारः रागादिचेष्टा । वा समुच्चये । यस्य देवस्य तव । पापं गच्छतीति पापगा । चेष्टा च पापगा यस्य नचास्ति । नो नच । वामैः रुद्रैः मिथ्यादृष्टिभिः । श्रीयते आश्रीयते । अपारा अगाधा अर्थनिचिता । यस्य ते । नयस्य आगमस्य त्वदभिप्रायस्य श्रीः लक्ष्मीः नयश्रीः । भुवि लोके । हे शंभव एवंविशिष्टस्त्वं मा पायाः । उत्तरश्लोकेन सम्बन्धः ॥ १८ ॥

पूतस्वेति—पूतः पवित्रः सु सुष्टु अनवमः² गणधराद्यनुष्ठितः आचारः पापक्रियानिवृत्तिर्यस्यासौ पूतस्वनवमाचारः अतस्तं पूतस्वनवमाचारम् । तन्वा शरीरेण आयातं आगतम् । भयात् संसारभीतेः । रुचा तेजसा । स्वया आत्मीयया आत्मीयतेजसेत्यर्थः । वामाः प्रधानाः प्रधा-

---

१ 'महोदयस्त्व' इति पूर्वश्लोकगतकर्मक्रियाभ्यां सम्बन्धः । अथवा 'स्ववर्द्ध नः' इत्यस्य 'सु+अव+ऋद्ध+नः' इति च्छेदं विधाय 'हे ऋद्धसम्पन्न ! नोऽस्मान्; स्ववसुष्टु रक्ष'—त्यर्थकरणे न पूर्वेण श्लोकेन महान्वय-योजनप्रयासः करणीयः ।

२ न अवमः अनवमः अनधम इत्यर्थः । "निकृष्टप्रतिकृष्टार्वरेफयाप्यवमाधमाः……समाः" इत्यमरः ।

नेपि वामशब्दः प्रवर्त्तते । वामानामीशः स्वामी वामेशः तस्य सम्बोधनं हे वामेश । पायाः रक्ष । पा रक्षणे इत्यस्य धोः आशीर्लिङ्-तस्य प्रयोगः । मा अस्मदः इबन्तस्य रूपम् । नतं प्रणतम् । एकैः प्रधानैः अर्च्यः पूज्यः एकार्च्यः, अथवा एकश्चासावर्च्यश्च एकार्च्यः तस्य सम्बोधनं हे एकार्च्य । शम्भवः तृतीयतीर्थकरभट्टारकः तस्य सम्बोधनं हे शम्भव ! किमुक्तं भवति—यस्य न इनः रागादिचेष्टा च पापगा यस्य नास्ति यस्य नाश्रीयते वामैः नयश्रीः हे शम्भव स त्वं स्वतेजसा मा आगतं शोभनाचारं नतं पायाः एतदुक्तं भवति ॥ १६ ॥

अर्थ—जिनके पाप बन्ध करानेवाली रागादिचेष्टाओंका सर्वथा अभाव हो गया है और जिनकी अपार नयलक्ष्मीका भूमितलपर मिथ्यादृष्टि लोग प्राप्त नहीं हो सकते ऐसे, इन्द्र चक्रवर्ती आदि प्रधान पुरुषोंके नायक ! अद्वितीय पूज्य ! हे शंभवनाथ जिनेन्द्र ! आप सबके स्वामी हैं--रक्षक हैं, अतः अपने दिव्य तेजद्वारा मेरी भी रक्षा कीजिये । मेरा आचार पवित्र और उत्कृष्ट है । मैं संसारके दुःखोंसे डर कर शरीरके साथ आपके समीप आया हूं ।

भावार्थ 'मैं किसीका भलाया बुराकरूं' इस तरह राग-द्वेषसे पूर्ण इच्छा और तदनुकूल क्रियाएं यद्यपि वीतराग के के नहीं होतीं तथापि वीतरागदेवकी भक्तिसे भक्त जीवोंका स्वतः भला हो जाता है, क्योंकि वीतरागकी भक्तिसे शुभ कर्मोंमें अनुभाग (रस) अधिक पड़ता है, फलतः पाप कर्मोंका रस घट जाता अथवा निर्बल पड़ जाता है और अन्तराय कर्म बाधक न रहकर इष्टकी सिद्धि सहज ही हो जाती है। इसी नयदृष्टिको लेकर अलंकारकी भाषामें आचार्य समन्त-भद्र भगवान् शंभवनाथसे प्रार्थना कर रहे हैं कि मैं संसारसे डर कर आपकी शरणमें आया हूं, मेरा आचार पवित्र है और मैं आपको नमस्कार कर रहा हूं अतः आप मेरी रक्षा कीजिये,

क्योंकि आप इस कार्यमें—समर्थ हैं—आपकी शरणमें पहुंचनेसे रक्षाकार्य स्वतः ही विना आपकी इच्छाके वन जाता है ॥ १८,१९ ॥

(अर्द्धभ्रमः)

धाम स्वयममेयात्मा मतयादभ्रया श्रिया ।
त्वया जिन विधेया मे यदनन्तमविभ्रम ॥२०॥

धामेति—धाम अवस्थानं तेजो वा । शोभनः अयः पुण्यं सुखं वा यस्मिन् तत् स्वयम् । अथवा स्वयं आत्मना । अमेयः अपरिमेयः आत्मा ज्ञानं स्वभावो वा यस्यासौ अमेयात्मा । मतया अभिमतया । अदभ्रया[1] । महत्या । श्रिया लक्ष्म्या । स्वया[2] आत्मीयया । हे जिन परमेश्वर । विधेयाः कुरु । वि पूर्वः धाञ करोत्यर्थे वर्त्तते । मे मम । यत् अनन्तं न विद्यते अन्तो विनाशो यस्य तदनन्तं धाम । विभ्रमः मोहः न विद्यते विभ्रमो यस्यासावविभ्रमः । तस्य सम्बोधनं हे अविभ्रम । एत-दुक्तं भवति—हे जिन अविभ्रम स्वकीयया श्रिया धाम अवस्थानं यद-नन्तं मे मम तत् विधेयाः ॥ २० ॥

अर्थ—हे मोहरहित शंभवनाथ जिनेन्द्र ! आप अपनी अभिमत विशाल लक्ष्मीसे हो अमेयात्मा—अनन्तज्ञानी हुए हो अतः आप मुझे भी उत्तम पुण्य या सुखसे सहित वह धाम—स्थान, तेज अथवा ज्ञान प्रदान कीजिये जिसका कभी अन्त न हो ॥ २० ॥

अभिनन्दन जिन स्तुतिः

अर्द्धभ्रमः ।

अतमः स्वनतारक्षी तमोहा वन्दनेश्वरः ।
महाश्रीमानजो नेता स्वव मामभिनन्दन ॥२१॥

१ अदभ्रं बहुलं बहुः इत्यमरः । २ स्वाज्ञातावात्मनि

अतम इति—तमः अज्ञानं न विद्यते तमो यस्यासावतमाः तस्य सम्बोधन हे अतमः। स्वतः आत्मनः नताः प्रणताः स्वस्मिन् नताः वा स्वनताः। आरक्षणशीलः आरक्षी। स्वनतानामारक्षी स्वनतारक्षी। तमो मोहं च हन्ति जहातीति तमोहा त्वं वन्दनेश्वरः वन्दनायाः ईश्वरः स्वामी वंदनेश्वरः। महती चासौ श्रीश्च महाश्रीः महाश्रीः विद्यते यस्यासौ महाश्रीमान्। न जायत इत्यजः। नेता नायकः। स्वव रक्ष सुपूर्वस्य अव रक्षणे इत्यस्य धोः लोडन्तस्य रूपम्। मां अस्मदः इवन्तस्य रूपम्। अभिनन्दनः चतुर्थजिनेश्वरः तस्य सम्बोधनं हे अभिनन्दन। किमुक्तं भवति—हे अभिनन्दन अतमः स्वनतारक्षी मन् त्वं तमोहा मन् इत्येवमादिः मन् मां अभिरक्ष॥ २१॥

अर्थ—हे अज्ञानान्धकारसे रहित! हे अभिनन्दननाथ जिनेन्द्र! जो आपको नमस्कार करते हैं उनकी आप रक्षा करते हैं। आप मोहसे रहित हैं, वन्दनाके ईश्वर हैं—सबके वन्द्य हैं, अनन्त चतुष्टय तथा अष्ट प्रातिहार्यरूप लक्ष्मीसे सहित हैं, अज हैं—भावी भवग्रहणरूप जन्मसे रहित हैं—और नेता हैं-मोक्षमार्गके उपदेशक हैं; अतः मेरी भी रक्षा कीजिये--मुझे भी संसारके दुःखोंसे बचाइये॥ २१॥

(गर्भे महादिशि चैकाक्षरश्चतुरक्षरचक्रश्लोकः[1]।)

नन्द्यनन्तद्‍र्ध्यनन्तेन नन्तेनस्तेऽभिनन्दन।
नन्दनर्द्धिरनम्रो न नम्रो नष्टोऽभिनन्द्य न॥२२॥

१ चक्राकार गोल रचना बनाकर उसके बीचमें स्वल्प गोलाकार गर्भ—चक्रमध्यकी रचना करे। फिर चक्रमध्यसे चारों दिशाओंमें चार आरोंकी रचना करे। इस अलंकारमें गर्भ और चार महादिशाओंके अन्तिम अक्षर एक समान होते हैं। चित्र परिशिष्टमें देखिये। यह अलंकार इस पुस्तकके २३वें और २४वें श्लोकमें भी हैं। २ नन्दी। अनन्तर्द्धि + अन-

नन्द्यनन्तेति—चक्रं भूमौ ह्यालिख्य गर्भे चक्रमध्ये चतसृषु महादिक्षु च एकाक्षरैः समानाक्षरैर्भवितव्यम्। चक्रमध्ये नकारं दत्वा, तस्योर्ध्वं बहिर्भागे अरमध्ये 'न्द्य' न्यस्य तस्याप्यूर्ध्वं महादिशि नकारं संस्थाप्य, नेमिमध्ये दक्षिणदिशि 'न्तर्ध्य' अक्षरे न्यसनीये। पुनर्महादिशि नकारं संस्थाप्य अरमध्ये 'न्ते' न्यस्य, गर्भे पुनरपि नकारो न्यसनीयः। पुनरपि गर्भे नकारः। अरमध्ये 'न्त' न्यस्य, महादिशि नकारः। एवं सर्वत्र तस्य संदृष्टिः। सप्ताक्षराणि समानानि गर्भाक्षरेणैकेन लभ्यन्ते। अरमध्ये चत्वार्यक्षराणि अन्यानि समानानि लभ्यन्ते। महादिक्ष्वपि चत्वार्यक्षराणि अन्यानि समानानि लभ्यन्ते एवमेतानि पञ्चदशाक्षराणि चक्रस्थितसप्तदशाक्षराणि गृहीत्वा श्लोकः सम्पद्यते। एवं सर्वे चक्रश्लोका द्रष्टव्याः।

अस्यार्थः कथ्यते—नन्दो वृद्धिः सोऽस्यास्तीति नन्दी अथवा नन्दनशीलो नन्दी अशुप्यपि शीले णिन् भवति। अनन्ता ऋद्धिः विभूतिर्यस्यासौ अनन्तर्द्धिः। न विद्यते अन्तो विनाशो यस्यासावनन्तः नन्दी चासौ अनन्तर्द्धिश्च नन्द्यनन्तर्द्धिः सचासावनन्तश्च नन्द्यनन्त-र्ध्यनन्तः तस्य सम्बोधनं हे नन्द्यनन्तर्ध्यनन्त। इन स्वामिन्। नन्ता स्तोता। इनः स्वामी, सम्पद्यत इत्यध्याहार्यः। ते तव। हे अभिनन्दन। नन्दना ऋद्धिर्यस्यासौ नन्दनर्द्धिः। न नम्रः अनम्रः। न प्रतिषेधे। किमुक्तं भवति—प्रवृद्धश्चार्यः पुरुषः स तव अनम्रो अप्रणतः न किन्तु नम्र एव। नम्र प्रणतः यः स नष्टो विनष्टो न। अभिनन्द्य त्वा अभिनन्द्य इत्यध्या-हार्यः। किमुक्तं भवति— हे अभिनन्दन ते नन्ता इनः सम्पद्यते कुतः नन्दनर्द्धिः यतः अप्रणतो नास्ति ते अभिनन्द्य च यो नम्र स विनष्टो न यतः॥ २२॥

न्तः, एषां कर्मधारये सति सम्बुद्धौ रूपम्, 'इन' इति सम्बुद्धौ पृथक् पदम्। 'नन्ता+इनः' इति पदच्छेदः। 'त्वा' इति पदमध्या-हार्यम्।

अर्थ—समृद्धि-सम्पन्न, अनन्त ऋद्धियोंसे सहित और अन्तरहित हे अभिनन्दन स्वामिन् ! आपको नमस्कार करने वाला पुरुष (आपके ही समान सबका) ईश्वर हो जाता है। जो बड़ी बड़ी ऋद्धियोंके धारी हैं वे आपके विषयमें अनम्र नहीं हैं—आपको अवश्य ही नमस्कार करते हैं और जो आपकी स्तुति कर नम्र हुए हैं वे कभी नष्ट नहीं होते—अवश्य ही अविनाशी मोक्षपदको प्राप्त होते हैं।

भावार्थ—जो सच्चे हृदयसे भगवानको नमस्कार करते हैं वे अनेक बड़ी ऋद्धियोंको प्राप्त होते हैं और अन्तमें कर्मोंका क्षय कर अविनाशी मोक्ष-पद पा लेते हैं। इसलिए आचार्यने ठीक ही कहा है कि आपको नमस्कार करनेवाले पुरुष आपके ही समान संसारके ईश्वर हो जाते हैं ॥२२॥*

(गर्भे महादिशि चैकाक्षरचक्रश्लोकः)

नन्दनश्रीर्जिन त्वा न[1] नत्वा[1] नर्द्धया स्वनन्दि न[2] ।
नन्दिनस्ते विनन्ता न[2] नन्तानऽन्तोभिनन्दन ॥२३॥

नन्दनेति नन्दना चासौ श्रीश्च नन्दनश्रीः पुरुषो वा। हे जिन। त्वा युष्मदः इवन्तस्य प्रयोगः। न न नत्वा किन्तु नत्वैव। ऋद्ध्या विभूत्या सह स्वनन्दि, क्रियाविशेषणम्। स्वनन्दि यथा भवति तथा स्वहर्ष यथा भवति। नन्दिनः समृद्धिमतः। ते तव। विनन्ता च विशेषनन्ता। न न नन्ता स्तोता। अनन्तः अविनश्वरः सिद्धः सम्पद्यते यतः। हे अभिनन्दन। किमुक्तं भवति—हे अभिनन्दन जिन नन्दिनस्ते नन्दनश्रीः

*नात्यद्भुतं भुवनभूषण भूतनाथ भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।
तुल्या भवन्ति भवतो ननु तेन किंवा भूत्याश्रितं य इह नात्मसमं करोति ॥
—भक्तामरस्तोत्रे मानतुंगः ।

१-१, २-२ द्वौ नञ् शब्दौ प्रकृतार्थस्य दाढ्यं सूचयतः ।

ऋद्ध्या सह त्वा न न नत्वा विनन्ता च तव न न यस्मात् नन्ता सर्वोपि अनन्तसिद्धः सम्पद्यते ॥ २३ ॥

अर्थ—हे अभिनन्दन जिन! आप अनन्त-चतुष्टयरूप समृद्धिसे सुशोभित हैं। जो समृद्धिशाली पुरुष प्रसन्नचित्त होकर अपनी विभूतिके साथ आपकी पूजा करता है—आपको नमस्कार करता है—वह अवश्य ही अनन्त हो जाता है—जन्ममरणसे रहित सिद्ध हो जाता है ॥२३॥

(गर्भमहादिशंकाक्षरचक्रश्लोकः)

नन्दनं त्वाप्यनष्टो न नष्टोऽनत्वाभिनन्दन ।
नन्दनस्वर नत्वेन[1] नत्वेनः[2] स्यन्न नन्दनः ॥२४॥

नन्दनं त्वेति—नन्दनं वृद्धिकरं । त्वा युष्मदः इबन्तस्य रूपम् । आप्य प्राप्य । नष्टो विनष्टो न । नष्टो विनष्टोऽनत्वा अस्तुत्वा । हे अभिनन्दन । नन्दनः प्रीतिकरः स्वरो वचनं यस्यासौ नन्दनस्वरः तस्य सम्बोधनं हे नन्दनस्वर । त्वा इत्यध्याहार्यः । त्वा नत्वा स्तुत्वा । इन स्वामिन । ननु एनः पापम् । स्यन् । विनाशयन् न नन्दनः किन्तु नन्दन एव । द्वौ नञौ प्रकृतमर्थं गमयतः । किमुक्तं भवति—हे अभिनन्दन त्वा नन्दनं आप्य न नष्टः यो नष्टः सः अनत्वैव, त्वा नत्वा एनः स्यन् न नु न नन्दनः किन्तु नन्दन एव ॥२४॥

अर्थ—हे मधुरभाषी अभिनन्दन जिन! आप केवलज्ञानादि गुणोंसे सम्पन्न हैं। आपको पाकर संसारमें कोई भी जीव नष्ट नहीं हुआ—आपके चरणकमलोंका आश्रय पानेवाला हरएक प्राणी अवश्य ही अविनाशी मोक्षपदको प्राप्त

१ 'नत्वा + इन' इति पदच्छेदः । २ 'ननु + एनः—पापमिति पदच्छेदः ।

हो जाता है। संसारमें नष्ट वही हुआ है—जन्म-मरणके दुख वही उठा रहा है--जिसने (हृदय से) आपको नमस्कार नहीं किया। हे स्वामिन ! जो आपको नमस्कार कर दुष्कर्मोंको—पापोंको—नष्ट करता है वह अवश्य ही ज्ञानादि गुणोंमें वर्ध-मान या सम्पन्न हो जाता है।

भावार्थ—जिनका हृदय आपकी भक्तिसे उज्ज्वल होता है वे ही जीव दुष्कर्मोंका क्षय कर उच्च अवस्थाको प्राप्त होते हैं-आत्मासे परमात्मा होजाते हैं—और वे ही जीव अन्तमें सब कर्मोंका विनाश कर मुक्त अवस्थाको प्राप्त होते हैं—संसार-के दुःखोंसे पूर्णतया छूट जाते हैं ॥ २४ ॥

सुमति-जिन-स्तुतिः

(समुद्गकयमकः।)

देहिनो जयिनः श्रेयः सदाऽतः सुमते ! हितः ।
देहि नोऽजयिनः[1] श्रेयः स दातः सुमतेहितः ॥२५॥

देहीति—यादृग्भूतं पूर्वार्द्धं पश्चार्द्धमपि तादृग्भूतमेव समुद्गक इव समुद्गकः।

देहिनः प्राणिनः। जयिनः जयनशीलस्य। कर्तरि ता। श्रेयः श्रय-णीयः। सदा सर्वकालम्। अतः अस्माद्धेतोः हे सुमते। हितः त्वम्। सुमतिरिति पंचमतीर्थङ्करस्य नाम। देहि डुदाञ् दाने इत्यस्य धोः लोडन्तस्य रूपम्। नः अस्माकम्। न जायते इत्यजः। इन स्वामिन। श्रेयः सुखम्। स एवं विशिष्टस्त्वम्। हे दातः दानशील। मतं आगमः

---

1 नः+अजः+इनः इति पदच्छेदः ! अज शब्दः स्वौजसमौडिति सुप्रत्ययः। ससजुषोरुरिति रुत्वम्। 'भो भगो अघो अपूर्वस्य योऽशि' इति रोर्यादेशः। लोपः शाकल्यस्येति विकल्पेन यकारलोपः। ततो नात्र विकल्पत्वाल्लोपः।

ईहितं चेष्टितम् । मतं च ईहितं च मतेहिते शोभने मते हिते यस्यासौ सुमतेहितः । किमुक्तं भवति—यो देहिनः श्रेयः यो वा दानशीलः यो वा सुमतेहितः हे सुमत स त्वं अतः देहि नः श्रेयः ॥२५॥

अर्थ—हे सुमति जिनेन्द्र ! आप कर्मरूप शत्रुओंको जीतनेवाले प्राणियोंके उपासनीय हैं—जो प्राणी अपने कर्मरूप शत्रुओंको जीतना चाहते हैं वे अवश्य ही आपकी उपासना करते हैं (क्योंकि आपकी उपासनाके बिना कर्मरूप शत्रु नहीं जीते जा सकते) आप सदा उनका हित करनेवाले हैं, आपके द्वारा प्ररूपित आगम और आपकी चेष्टाएं उत्तम हैं । आप अज हैं—जन्म-मरणकी व्यथासे रहित है, सबके स्वामी हैं । हे दानशील भगवन ! मुझे भी मोक्षरूप कल्याण प्रदान कीजिये ॥२५॥

(चक्रश्लोकः[1])

वरगौरतनुं देव वंदे नु त्वाक्षयार्जव[2] ।
वर्जयार्तिं त्वमार्याव वर्यामानोरुगौरव ॥२६॥

वरगौरेति—वरा श्रेष्ठा गौरी उत्तप्तकाञ्चननिभा तनुः शरीरं यस्यासौ वरगौरतनुः अतस्तं वरगौरतनुं । हे देव भट्टारक । वन्दे स्तौमि । नु अत्यर्थम् । त्वा भट्टारकम् । क्षयः विनाशः आर्जवं ऋजुत्वम्, अपेक्षापूर्वकारित्वमित्यर्थः । क्षयश्च आर्जवं च क्षयार्जवे न विद्येते क्षयार्जवे यस्यासावक्षयार्जवः तस्य सम्बोधनं हे अक्षयार्जव । वर्जय निराकुरु ।

---

१ इसकी रचना २२ वें श्लोकके समान है, उसमें गर्भ और चार महादिशाओंके अन्तिम अक्षर एक समान थे परन्तु इसमें महादिशाओंके अक्षर भिन्न हैं । यह अलंकार इस ग्रन्थके ५३ और ५४ नम्बरके श्लोकोंमें भी है । चित्र परिशिष्टमें देखिये ।

२ 'त्वा+अक्षयार्जव' इति पदच्छेदः । अक्षयोऽविनश्वरः आर्जवोऽमायित्व लक्षणो धर्मोयस्य स तत्सम्बोधनम् ।

अर्त्तिं पीडाम्। त्वं आर्य योगिन्। नः इत्यध्याहार्यः तेन सम्बन्धः। नः अस्मान्। अव रक्ष। हे वर्य प्रधान। अमानोरुगौरव। अमानं अपरिमाणं उरु महत् गौरवं गुरुत्वं यस्य सः अमानोरुगौरवः तस्य सम्बोधनं हे अमानोरुगौरव। एतदुक्तं भवति—हे देव त्वा वन्दे। अस्माकं अर्त्ति- वर्जय। अस्मान् रक्ष च ॥२६॥

अर्थ—हे विनाश और अविवेकसे रहित ! (अथवा हे अविनाशी आर्जव धर्मसे सहित !) हे आर्य ! हे सर्वोत्तम ! हे अपरिमित-विशाल गौरवसे युक्त ! सुमतिदेव ! जिनका शरीर तपाये हुए सुवर्णके समान अत्यन्त गौर वर्ण है ऐसे आपके लिये मैं नमस्कार करता हूं। आप मेरे जन्म मरणके दुःख नष्ट कीजिये तथा संसारके दुःखोंसे मेरी रक्षा कीजिये ॥ २६ ॥

पद्मप्रभ-जिन-स्तुतिः

(अर्द्धभ्रमः)

अपापापदमेयश्रीपादपद्म प्रभोऽर्दय ।
पापमप्रतिमाभो मे पद्मप्रभ मतिप्रद ॥२७॥

अपापेति—पापं पुराकृतं दुष्कृतम्, आपत् अन्यकृतशारीरमानसदुःखम्, पापं च आपच्च पापापदौ न विद्येते पापापदौ ययोस्तौ अपापापदौ। अमेया अपरिमेया श्री लक्ष्मीः ययोस्तौ अमेयश्रियौ। अपापापदौ च तावमेयश्रियौ च तौ अपापापदमेयश्रियौ। पादावेव पद्मौ पादपद्मौ। अपापापदमेयश्रियौ तौ पादपद्मौ यस्यासौ अपापापदमेयश्रीपादपद्मः तस्य सम्बोधनं हे अपापापदमेयश्रीपादपद्म। प्रभो स्वामिन्।

अर्दय हिंसय विनाशय । पापं दुष्कृतम् । अप्रतिमा अनुपमा आभा दीप्ति-र्यस्यासावप्रतिमाभः अनुपमतेजाः । मे मम । पद्मप्रभ षष्ठ तीर्थंकर । मतिं सद्विज्ञानं प्रददातीति मतिप्रदः तस्य सम्बोधनं हे मतिप्रद । एत-दुक्तं भवति—हे पद्मप्रभ मम पापं अर्दय । अन्यानि सर्वाणि पदानि तस्यैव विशेषणानि ॥२७॥

अर्थ—हे प्रभो ! आपके चरणकमल पूर्वसंचित पापकर्मसे रहित हैं, आपत्तियोंसे शून्य हैं, और अपरिमित लक्ष्मी के—शोभाके-आधार हैं । तथा आप स्वयं भी अनुपम आभासे—तेजसे सहित हैं । हे सम्यग्ज्ञानके देनेवाले पद्मप्रभ जिनेन्द्र ! मेरे भी पापकर्म नष्ट कीजिये ।

भावार्थ--आपके निष्पाप—पवित्र चरणकमलोंके आश्रयसे मनुष्यको वह सम्यग्ज्ञान प्राप्त होता है, जिसके द्वारा वह अपने समस्त पापकर्म तथा उनके फलस्वरूप प्राप्त हुई आपत्तियोंको नष्टकर अनन्तचतुष्टयरूप लक्ष्मीसे सहित होजाता है और तब उसकी आत्मा अनन्त तेजसे प्रभासित हो उठती है ॥२७॥

———

(गतप्रत्यागतपादयमकश्लोकः)

वंदे चारुरुचां देव भो वियाततया विभो ।
त्वामजेय यजे मत्वा तमितांतं ततामित ॥२८॥

वन्दे इति—प्रथमपादस्याक्षरचतुष्टयं क्रमेणालिख्य पठित्वा पुन-रपि तेषां व्युत्क्रमेण पाठः कर्त्तव्यः । क्रमपाठे यान्यक्षराणि विपरीत-पाठेऽपि तान्येव । एवं सर्वे पादा द्रष्टव्याः ।

वन्दे नौमि । चार्वी शोभना रुग् दीप्तिर्भवितव्या येषां ते चारुरुचः अतस्तेषां चारुरुचाम् । देव भो भट्टारक ! वियाततया वियातस्य भावो

वियातता तया वियाततया[1] धृष्टत्वेन। विभो प्रभो। त्वाम्। अजेयः न जीयत इत्यजेयः तस्य सम्बोधनं अजेय। यजे पूजये। मत्वा विचार्य। तमितः नष्टः अन्तः क्षयो यस्यासौ तमितान्तः तं तमितान्तम्। ततं प्रतिपादितं अमितः अमेयं वस्तु येनासौ ततामितः तस्य सम्बोधनं हे ततामित। एतदुक्तं भवति—भो चारुरुचां देव त्वां वन्दे यजे च वियाततया। अन्यान्यस्यैव विशेषणानि ॥ २८ ॥

अर्थ—हे विभो ! आप उत्तम कान्ति, भक्ति अथवा ज्ञानसे सम्पन्न जीवोंके देव हो—उनमें अत्यन्त श्रेष्ठ हो—अन्तरङ्ग और बहिरङ्ग शत्रुओंसे अजेय हो, अनन्त पदार्थोंका निरूपण करने-वाले हो अथवा ज्ञान-दर्शनादि गुणोंसे विस्तृत और सीमारहित हो। हे पद्मप्रभदेव ! मैं आपको अन्तरहित-अविनश्वर मान-कर बड़ी धृष्टतासे नमस्कार करता हूँ और बड़ी धृष्टतासे ही आपकी पूजा कर रहा हूं।

भावार्थ—यहां आचार्यने यह भाव व्यक्त किया है कि जब इन्द्र तथा गणधर भी आपके योग्य आपकी पूजा वा नमस्का-रादि नहीं कर सकते तब आपके प्रति मेरा पूजन वा नमस्का-रादि करना धृष्टताके सिवाय और क्या हो सकता है ? ॥२८॥

सुपार्श्व-जिन-स्तुतिः

(मुरजः)

स्तुवाने कोपने चैव समानो यन्न पावकः ।
भवानेकोऽपि नेतेव त्वमाश्रेयः सुपार्श्वकः ॥२९॥

स्तुवान इति—स्तुवाने वन्द्यमाने। कोपने क्रोधने कोपं करोतीति कोपनः[2] अतस्तस्मिन्। च समुच्चये। एवाऽवधारणे। समानः सदृशः।

---

1 'धृष्टेधिष्णुवियातश्च' इत्यमरः। २ ल्युट् च।

यत् यस्मात् । न प्रतिषेधे । पुनातीति पावकः पवित्रः । नाग्निः । भवान् भट्टारकः । न प्रतिषेधे । एकोपि[1] प्रधानोपि असहायोपि । नेतेव नायक इव । त्वं युष्मदः प्रयोगः । आश्रेयः आश्रयणीयः । सुपार्श्वकः सप्तमतीर्थकरस्वामी । किमुक्तं भवति—स्तुतिं करोति यः कोपं करोति यः तयोः द्वयोर्न न समानः किन्तु समान एव । ततः त्वं सुपार्श्वकः एकोपि सन् पावक इति कृत्वा नेतेव सर्वेषपि आश्रेयः ॥ २९ ॥

अर्थ—हे भगवन् ! सुपार्श्वनाथ ! आप, स्तुति करनेवाले और निन्दा करनेवाले—दोनोंके विषयमें समान हैं—रागद्वेष से रहित हैं। सबको पवित्र करनेवाले हैं—सबको हितका उपदेश देकर कर्मबन्धनसे छुटानेवाले हैं। अतः आप एक असहाय (दूसरे पक्षमें प्रधान) होनेपर भी नेताकी तरह सबके द्वारा आश्रयणीय हैं—सेवनीय हैं।

भावार्थ—जिस तरह एक ही नेता अनेक आदमियोंको मार्ग प्रदर्शनकर इष्ट स्थानपर पहुँचा देता है उसी तरह आप भी अनेक जीवोंको मोक्षमार्ग बतलाकर इष्ट स्थानपर पहुंचा देते हैं और स्वयं भी पहुंचे हैं अतः आप सबकी श्रद्धा और भक्तिके भाजन हैं ॥२९॥

चन्द्रप्रभ-जिन-स्तुतिः

(मुरजः)

चन्द्रप्रभो दयोजेयो विचित्रेऽभात कुमण्डले ।
रुन्द्रशोभाक्षयोमेयो रुचिरे भानुमण्डले ॥३०॥

चन्द्रप्रभ इति—चन्द्रप्रभः अष्टमतीर्थंकरः । दयते इति दयः रक्षकः । न जीयते इत्यजेयः जिताशिचक इत्यर्थः । विचित्रे नानाप्रकारे । अभात् शोभितः भा दीप्तौ अस्य धातोर्लङन्तस्य रूपम् । कुमण्डले पृथ्वी-

1 एक मुख्यान्यकेवलाः ।

मण्डले मण्डलमिति वृत्तप्रदेशस्य संज्ञा । रुन्द्रा[2] अमन्दा महती शोभा दीप्ति र्यस्यासौ रुन्द्रशोभः। न क्षीयत इत्यक्षयः । अमेयः अपरिमेयः । रुचिरे दीप्ते । भानूनां प्रभाणां मण्डलं संघातः भानुमण्डलं तस्मिन् भानुमंडले सति । चन्द्रेण सह श्लेषः । कानिचित्साधर्म्येण विशेषणानि कानिचिद्वैधर्म्येण । एतदुक्तं भवति—चन्द्रप्रभस्त्वं कुमण्डले विचित्रे अभात् रुचिरे भानुमंडले सति । अन्यानि चन्द्रप्रभभट्टारकस्यैव विशेषणानि । दयः अजेयः रुन्द्रशोभः अक्षयः अमेयः चन्द्रप्रभचन्द्रयोः समानत्वं, किन्तु एतावान् विशेषः । स जेयो राहुणा अयमजेयः । स क्षयः अयमक्षयः । स मेयः अयममेयः । स पृथ्वीमण्डले अयं पुनस्त्रैलोक्ये अलोके च । अयं व्यतिरेकः ॥ ३० ॥

अर्थ—हे चन्द्रप्रभ जिनेन्द्र ! आप चन्द्रमा-जैसी प्रभासे सम्पन्न हैं परन्तु चन्द्रमा और आपमें निम्नलिखित व्यतिरेक-विशेषताएं हैं । आप सबके रक्षक हैं—सबको सुख देनेवाले हैं परन्तु चन्द्रमा चकवा-चकवी आदिको दुःख देनेवाला है । आप अजेय हैं—किसीके द्वारा नहीं जीते जा सकते—परन्तु चन्द्रमा राहुके द्वारा जीत लिया जाता है । आप तीनों लोकों तथा अलोक-में भी प्रकाशमान रहते हैं—सब जगहके पदार्थोंको जानते हैं परन्तु चन्द्रमा सिर्फ पृथ्वी-मण्डलमें ही प्रकाशमान रहता है । आपकी शोभा रुन्द्र है—अतिविशाल है—परन्तु चन्द्रमाकी शोभा सीमित है । आप क्षय-रहित हैं, किन्तु चन्द्रमा क्षय सहित है—कृष्णपक्षमें क्रम क्रम से क्षीण होता जाता है । आप अमेय हैं—अपरिमित हैं अर्थात् आपके गुणोंका कोई परिमाण नहीं है अथवा आप प्रमाणके विषय नहीं हैं; परन्तु चन्द्रमा मेय है—परिमित है—उसके १६ कलायें हैं तथा प्रमाणका विषय है, आप सूर्यमण्डलके देदीप्यमान रहते हुए भी शोभायमान रहते हैं परन्तु चन्द्रमा सूर्यमण्डलके सामने शोभा-रहित होजाता है ।

१ रुन्द्रो विपुलम् ।

भावार्थ---इस श्लोकमें चन्द्रप्रभ इस श्लिष्ट विशेषणसे पहले तो अष्टम तीर्थंकर चन्द्रप्रभ और चन्द्रमामें सादृश्य बतलाया गया है परन्तु बादमें अन्य विशेषणोंकेद्वारा चन्द्रमाकी अपेक्षा अष्टमतीर्थंकरमें-वैशिष्ट्य सिद्ध किया गया है ॥३०॥

(मुरजः)

प्रकाशयन् खमुद्भूतस्त्वमुद्घांककलालयः ।
विकासयन् समुद्भूतः कुमुदं कमलाप्रियः ॥३१॥

प्रकाशेति—चन्द्रप्रभः अभादिति सम्बन्धः । किं विशिष्टः प्रकाशयन् तिमिरं प्रपाटयन् । खं आकाशं । उद्भूतः उद्गतः । त्वं । उद्घः महान् अंकः चिह्नं यस्यासौ उद्घांकः, कलानां कलागुणविज्ञानानां लेखानां वा आलयः आधारः कलालयः,उद्घांकश्चासौकलालयश्च उद्घांककलालयः । विकासयन् प्रबोधयन् । समुद्भूतः । कुमुदं पृथ्वीहर्षम् । अन्यत्र कुमुदं पुष्पम् । कमलायाः लक्ष्म्याः प्रिय इष्टः । अन्यत्र कमलानां पद्मानां अप्रियः अनिष्टः कमलाप्रियः । एतदुक्तं भवति—त्वं-चन्द्रप्रभोऽभात् एतत् कुर्वन् एवं गुणविशिष्टः चन्द्रेण समानः । श्लेषालंकारोऽयम् ॥३१॥

अर्थ—हे विभो ! आप चन्द्ररूप हैं, क्योंकि जिस तरह चन्द्रमा उदय होते ही आकाशको प्रकाशित करता है उसी तरह आप भी (केवल ज्ञानके प्राप्त होनेपर) समस्त लोकाकाश और अलोकाशको प्रकाशित करते हैं । चन्द्रमा जिस तरह हरिणके मनोहर चिह्नसे युक्त है उसी तरह आप भी मनोहर चिह्न जो 'अर्धचन्द्र' उससे युक्त हैं । चन्द्रमा जिस तरह सोलह कलाओंका आलय (गृह) है उसी तरह आप भी केवलज्ञान आदि अनेक कलाओंके आलय-स्थानहैं । चन्द्रमा जिस तरह कुमुदों-नीलकमलोंको विकसित करता हुआ उदित होता है उसी तरह

आप भी कु-पृथिवी-गत समस्त जीवोंके आनन्दको बढ़ाते हुए उदित हुए हैं—उत्पन्न हुए हैं और चन्द्रमा जिस प्रकार कमला-प्रिय है—(कमल+अप्रिय) कमलोंका शत्रु है—उन्हें निमीलित कर देता है उसी प्रकार आप भी कमलाप्रिय हैं—केवलज्ञानादि लक्ष्मीके प्रिय हैं।

इस श्लोकमें विशेषण सादृश्यसे अष्टम तीर्थंकरको चन्द्रमा बतलाया गया है। यह श्लेषालंकार है।

नोट—श्लोकगत समस्त विशेषणोंसे जैसे अष्टम तीर्थंकर और चन्द्रमामें सादृश्य सिद्ध किया गया है वैसे ही उन दोनोंमें वैसादृश्य—व्यतिरेक भी सिद्ध होता है। इस पक्ष में श्लोकका अर्थ इस प्रकार होगा—

हे भगवन्! आप चन्द्रमाकी तरह शोभायमान हैं अवश्य, परन्तु आपमें उसकी अपेक्षा नीचे लिखी हुई विशेषतायें हैं—चन्द्रमा सिर्फ आकाश-विवरको प्रकाशित करता हुआ उदित होता है, परन्तु आप अखिल विश्वको प्रकाशित करते हुए (द्रव्यार्थिकनयकी अपेक्षा) अनादिकालसे उदित ही हैं। चन्द्रमाका चिह्न कृष्ण है—कलङ्करूप है, जिससे वह कलङ्की कहलाने लगा है परन्तु आपका चिह्न अर्धचन्द्र अत्यन्त मनोहर है अथवा आपके शरीरमें जो १००८ सामुद्रिक चिह्न हैं वे भी अत्यन्त सुन्दर हैं। चन्द्रमा कलालय है—अपनी कलाओंका लय विनाश लिए हुए है परन्तु आप केवलज्ञान आदि कलाओंके आलय—घर हैं। चन्द्रमा कुमुद्—कुत्सित-वैषयिक मुद्-हर्षको अथवा दुर्जन पुरुषोंके हर्षको (पक्षमें कुमुद पुष्पको) वृद्धिगत करता है परन्तु आप उत्कृष्ट आत्मीय आनन्दको अथवा समस्त पृथ्वीगत जीवधारियोंके आनन्दको वृद्धिगत करते हैं—बढ़ाते हैं। चन्द्रमा उदित होकर अस्त होजाता है परन्तु आप हमेशा उदित ही रहते हैं—आप कभी अस्तमित नहीं होते। चन्द्रमा कमलोंको

अप्रिय है—विरोधी है परन्तु आप कमलोंके अप्रिय नहीं हैं (पक्षमें कमला—अनन्त चतुष्टयरूप लक्ष्मीके—प्रिय-पति हैं)। हे भगवन्! इस तरह आप अनोखे चन्द्रमा हैं ॥३१॥

(मुरजः)

धाम त्विषां तिरोधानविकलो विमलोऽक्षयः ।
त्वमदोषाकरोऽस्तोनः सकलो विपुलोदयः ॥३२॥

धामेति—चन्द्रप्रभोऽभात् अत्रापि सम्बन्धनीयः। धाम अवस्थानम्। त्विषां तेजसाम्। तिरोधानेन व्यवधानेन विकलः विरहितः अन्यत्राविकलः तिरोधानविकलः। विमलो निर्मलः, चन्द्रः पुनः समलः। न क्षीयत इत्यक्षयः, अन्यः सक्षयः। त्वं भट्टारकः। अदोषाणां गुणानां आकरः निवासः, अन्यत्र दोषायाः रात्रेः आकरः दोषाकरः। अस्ताः क्षिप्ताः ऊनाः असर्वज्ञतारका: येनासावस्तोनः। सकलः सम्पूर्णः, अन्योऽसम्पूर्णः। विपुलः महान् उदयः उद्गमो यस्यासौ विपुलोदयः। अन्यः पुनः अविपुलोदयः। किमुक्तं भवति—त्वं चन्द्रप्रभः एवंविधगुणविशिष्टः सन् पृथ्वीमण्डले अभात् शोभित इति सम्बन्धः ॥३२॥

अर्थ—हे प्रभो! आप चन्द्रमाके समान शोभायमान हैं अवश्य परन्तु आपमें और उसमें भारी भेद है। आप केवलज्ञानरूप तेजके स्थान हैं-तेजस्वी हैं, परन्तु चन्द्रमा तेजसे रहित है। आप तिरोधानसे रहित हैं—संसारके किसी भौतिक पदार्थसे आपका आवरण नहीं होता, परन्तु चन्द्रमा मेघ आदिसे आवृत हो जाता है—छिपा लिया जाता है। आप विमल हैं—कर्ममल-कलङ्कसे रहित हैं परन्तु चन्द्रमा समल है—कलङ्कसे सहित है। आप अक्षय हैं—विनाश रहित हैं—आपके केवलज्ञानादि गुणोंका कभी नाश नहीं होता, परन्तु चन्द्रमा क्षय-सहित है—उदय होनेके बाद अस्त हो जाता है। आप अदोषाकर हैं—दोषोंकी आकर (खानि) नहीं हैं—आपने क्षुधा-तृषा आदि अठारह दोष

नष्ट कर दिये हैं परन्तु चन्द्रमा ऐसा नहीं है, वह दोषाकर है— अनेक दोषोंकी खान है (संसारी पुरुष जो ठहरा) पक्षमें दोषा—रात्रिको करने वाला है आपने असर्वज्ञरूप ताराओंको अस्तकर दिया है—आपके लोका-लोकावभासी सर्वज्ञत्वके सामने संसार के अन्य अल्पज्ञ—हरिहरादि प्रभाव-रहित हो जाते हैं परन्तु चन्द्रमा अपनेसे हीनद्युति-ताराओंको अस्त नहीं कर सकता। आप सकल हैं—सम्पूर्ण हैं अथवा केवलज्ञान, सद्वक्तृत्व आदि अनेक कलाओंसे सहित हैं—परन्तु चन्द्रमा विकल है— अपूर्ण है—[1]कलाओंसे रहित है। आपका उदय महान् है—आप एक स्थानमें स्थित होते हुए भी अपने ज्ञानगुणसे संसारके समस्त पदार्थोंको प्रकाशित करते हैं—जानते हैं—परन्तु चन्द्रमाका उदय सीमित है—वह चल फिर कर सिर्फ थोड़ेसे पदार्थोंको प्रकाशित कर पाता है।

[यह श्लेषमूलक व्यतिरेकालंकाकार है] ॥३२॥

(मुरजः)

यत्तु खेदकरं ध्वान्तं सहस्रगुरपारयन्।
भेत्तुं तदन्तरत्यन्तं सहसे गुरु पारयन् ॥३३॥

यत्तुखेदेति—यत् यद्रोरूपम्। तु अप्यर्थे। खेदकरं दुःखकरं खेदं करोतीति खेदकरम्। ध्वान्तं तमः अज्ञानं मोहः। सहस्रगुरादित्यः अपिशब्दोऽत्र सम्बन्धनीयः। सहस्रगुरपि अपारयन् अशक्नुवन्। भेत्तुं विदारयितुम्। तत् ध्वान्तम्। अन्तः अभ्यन्तरम्। अत्यन्तं अत्यर्थम्। अथवा अन्तमतिक्रान्तं अत्यन्तम्। सहसे समर्थो भवसि। भेत्तुं अत्रापि सम्बन्धनीयं काकाक्षिवत्। गुरु महत्। पारयन् शक्नुवन्। त्वं चन्द्रप्रभ इति सम्बन्धनीयम्। किमुक्तं भवति—त्वं चन्द्रप्रभः यदन्तर्ध्वान्तं

---

[1] 'कला तु षोडशो भागः' इत्यमरः—चन्द्रमाका सोलहवां हिस्सा कला कहलाता है।

खेदकरं भेत्तुं सहस्रगुरपि अपारयन् तत् ध्वान्तं भेत्तुं सहसे समर्थो भवसि पारयन् सन् ॥३३॥

अर्थ हे भगवन्! जिस, अत्यन्त दुःख देने वाले मोहरूप अन्तरङ्ग और सघन अन्धकारको नष्ट करनेके लिये हजार किरणोंको धारण करने वाला सूर्य भी समर्थ नहीं है उस अन्धकारको आप जड़मूलसे नष्ट कर देते हैं।

भावार्थ—सूर्य तिमिरारि—अन्धकारका—शत्रु कहलाता अवश्य है परन्तु वह अपने विषय—क्षेत्रमें स्थित-सिर्फ भौतिक अन्धकारको नष्ट कर पाता है जब कि आप प्राणियोंके अन्तरिक मोह अथवा अज्ञान अन्धकारको भी नष्ट कर देते हैं। अतः आप सूर्यसे अत्यन्त श्रेष्ठ हैं। यहां व्यतिरेकालंकार गम्य है ॥३३॥

(मुरजः)

खलोलूकस्य [1]गोव्रातस्तमस्ताप्यति भास्वतः।
कालोविकलगोघातः[2] समयो[3]ऽप्यस्य भास्वतः ॥३४॥

खलोलूकेति—त्वं चन्द्रप्रभोऽभूः इति सम्बन्धः। अर्थवशाद्विभक्तिपरिणामो भवतीति त्वमिति भास्वतः सम्बन्धात् च भवति। खलश्चासावुलूकश्च खलोलूकः तस्य खलोलूकस्य। गवां रश्मीनां व्रातः संघातः गोव्रातः। तमः अन्धकारः। तापी दहनस्वरूपश्च सम्पद्यत इत्यध्याहार्यः। अति अत्यर्थम्। भास्वतः आदित्यस्य। ते पुनः चन्द्र-

१ 'गौः पुमान् वृषभे स्वर्गे खण्डवज्रहिमांशुषु। स्त्रीगवि भूमिदिग्नेत्रवाग्वाणसलिले स्त्रियः'—इति विश्वलोचनः।

२ अविकलगः, विकलगः आघातः, घातः, इति पदद्वये—पदच्छेदः।

३ 'समयः शपथाचारकालसिद्धान्तसंविदः'—इत्यमरः।

प्रभस्य भास्वतः प्रकाशयतः गोव्रातः वचनकदम्बकः नापि कस्यचित्तमो न ताप्यति तापि व्यतिरेकः । कालः समयः मुहूर्तादिः । अविकलगः अप्रतिहतः । अन्यत्र विकलगः प्रतिहतः । अघातः प्रतिपक्षरूपैर्घातो नास्ति । अन्यत्र मेघादिभिरस्त्येव । समयोऽपि दर्शनमपि । अस्य भट्टा-कस्य भास्वतः सन् । एवंभूत एव अघातः अविकलगः नान्यत्र । एत-दुक्तं भवति—भास्वतः गोव्रातः एवंभूतः कालः समयश्च नादित्यस्य । अतस्त्वं चन्द्रप्रभः अभूः कुमण्ले इति सम्बन्धः ॥३४॥

अर्थ—हे भगवन् ! सूर्यकी किरणोंका समूह दुष्ट उलूकके लिये अन्धकार रूप परिणत होता है तथा सबको सन्ताप करने वाला होता है परन्तु हमेशा प्रकाशमान रहने वाला आपकी किरणों अथवा वचनोंका समूह न तो किसीको अन्धकाररूप होता है और न किसीको सन्ताप देनेवाला होता है—आपके वचनोंसे सबका अज्ञान अथवा मोहरूप अन्धकार नष्ट हो जाता और सबको आनन्द होता है । सूर्यका काल रात्रिसे व्यवहित है परन्तु आपका काल अव्यवहित है—आप दिन-रात—हर समय—प्रकाशमान रहते हैं । सूर्यके समयका मेघ आदि प्रतिपक्षी पदार्थोंसे घात हो जाता है. मेघ वृक्ष आदि पदार्थ सूर्य तथा उसके प्रकाशको ढक लेते हैं परन्तु आपके समयका सिद्धान्त (दर्शन) का घात संसारके अन्य किन्हीं भी प्रतिवादियोंद्वारा नहीं हो सकता—आपका स्याद्वाद सिद्धान्त अजेय है । सूर्य दिनमें भास्वत्—प्रकाशमान रहता है परन्तु आप सदा प्रकाशमान रहते हैं । अतएव हे चन्द्रप्रभ जिनेन्द्र ! आप सूर्यसे भी अधिक शोभाय-मान हैं ।

यहां व्यतिरेकालंकार है । 'गो' और 'समय' शब्दका श्लेष उसकी शोभा बढ़ा रहा है ॥३४॥

(मुरजः)

लोकत्रयमहामेयकमलाकरभास्वते ।
एकप्रियसहायाय नम एकस्वभाव ते ॥३५॥

लोकत्रयेति—लोकत्रयमेव महामेयं वस्तु लोकत्रयमहामेयम्, कमलानां पद्मानां आकरः कमलाकरः नलिनीवनम् । लोकत्रयमहामेयमेव कमलाकरः लोकत्रयमहामेयकमलाकरः तस्य भास्वान् रविः लोकत्रयमहामेयकमलाकरभास्वान् तस्मै लोकत्रयमहामेयकमलाकरभास्वते । एकः प्रधानः । प्रियः इष्टः । सहायः बन्धुः । प्रियश्चासौ सहायश्च प्रियसहायः एकश्चासौ प्रियसहायश्च एकप्रियसहायः तस्मै एकप्रियसहायाय । नमः अव्युत्पन्नो भि संज्ञकः पूजावचनः अस्य योगे अप् । एकस्वभाव एकस्वरूप । ते तुभ्यम् । किमुक्तं भवति—चन्द्रप्रभ इत्यनुवर्तते हे चन्द्रप्रभ एकस्वभाव तुभ्यं नमः एवं विशिष्टाय ॥३५॥

अर्थ—सदा एक रूप रहनेवाले हे चन्द्रप्रभ जिनेन्द्र ! आप ऊर्ध्व-मध्य-पाताल लोकरूप विशाल—अपरिमित—कमलवनको विकसित करनेके लिये सूर्य हैं तथा सबके प्रधान और प्रियबन्धु हैं अतः आपको नमस्कार हो ।

भवार्थ-यद्यपि संसारके अन्य महापुरुष साधारण प्राणियोंकी अपेक्षा उच्च पदको प्राप्त हुए हैं परन्तु उनका वह पद सत्कर्मोदयजनित होनेसे कालान्तरमें अवश्य ही नष्ट हो जाता है अतः उन्हें एक स्वभाव नहीं कहा जा सकता । परन्तु जिनेन्द्रदेवने जिस उत्कृष्ट पदको प्राप्त किया है उसका कर्मक्षयजनित होनेसे कालान्तरमें कभी नाश नहीं होता अतः आचार्य समन्तभद्रने उन्हें एकस्वभाव कहा है । ॥३५॥

(अर्द्धभ्रमगूढद्वितीयपादः)

चारुश्रीशुभदौ नौमि रुचा वृद्धौ प्रपावनौ ।
श्रीवृद्धौतौ शिवौ पादौ शुद्धौ तव शशिप्रभ ॥३६॥

चारुश्रीति—यानि द्वितीयपादाक्षराणि तानि सर्वाणि अन्येषु पदेषु सन्तीति ।

श्रीश्च शुभं च श्रीशुभे चारुणी च ते श्रीशुभे च चारुश्रीशुभे ते दत्तः इति चारुश्रीशुभदौ । नौमि स्तौमि क्रियापदमेतत् । रुचा दीप्त्या । वृद्धौ महान्तौ । प्रपावनौ पवित्रीभूतौ । श्रियं वृणुत इति श्रीवृतौ श्रीवृतैश्च तौ धौतौ च प्रक्षालितौ श्रीवृद्धौतौ । शिवौ शोभनौ । पादौ चरणौ । शुद्धौ शुची । तव ते । हे शशिप्रभ । एतदुक्तं भवति—शशिप्रभ तव पादौ नौमि किं विशिष्टौ तौ एवं गुणविशिष्टौ । अन्यानि सर्वाणि अनयोरेव विशेषणानि ॥३६॥

अर्थ—हे चन्द्रप्रभ जिनेन्द्र ! आपके चरण कमल सुन्दर समवसरणादि लक्ष्मी और निःश्रेयस आदि कल्याणको देने-वाले हैं, कान्तिसे बढ़े हुए हैं—कान्तिमान् हैं, अत्यन्त पवित्र हैं, अन्तरङ्ग-बहिरङ्ग लक्ष्मीको वरने वाले है, प्रक्षालित हैं अथवा इन्द्र, चक्रवर्ती योगीन्द्र और विविध लक्ष्मीवान पुरुषोंके द्वारा प्रक्षालित हैं, कल्याण रूप हैं और अत्यन्त शुद्ध हैं अतः उन्हें नमस्कार करता हूं । ॥३६॥

पुष्पदन्त-जिन-स्तुति

(निरौष्ठ्यश्लोकयमकः[1])

शंसनाय कनिष्ठायाश्चेष्टाया यत्र देहिनः ।
नयेनाशंसितं श्रेयः सद्यः सन्नज राजितः ॥३७॥

---

1 इस श्लोकमें ओष्ठस्थानीय उवर्ण, पवर्ग और उपध्मानीय अक्षर नहीं हैं । साथमें श्लोकावृत्ति होनेसे श्लोकयमक भी है ।

शं स नायक निष्ठायाश्चेष्टायायत्र देहि नः ।
न येनांशं सितं श्रेयः सद्यः सन्नजराजितः ॥३८॥
(युग्मम्)

शंसेति—औष्ठ्यमक्षरमत्र श्लोके नास्ति द्विरावर्त्तते च इति हेतोः । शंसनाय प्रशंसनार्थं[1] । कनिष्ठयाः अणुभूतायाः । चेष्टायाः कायवाङ्-मनः-क्रियायाः । यत्र यस्मिन् सर्वज्ञविशेषे । देहिनः प्राणिनः सम्बन्धेन । नयेन अभिप्रायेण । आशंसितं सम्भावितं । श्रेयः पुण्यम्, । सत् शोभनम् । यः यश्च । द्वितीयार्थे व्याख्यायमाने च शब्दोऽतिरेकः सोऽत्र सम्बन्धनीयः । हे अज सर्वज्ञ । राजितः शोभितः । सन् भवन् । उत्तरार्धे क्रिया तिष्ठति तया सम्बन्धः कर्तव्यः ॥३७॥

शंसनेति—शं सुखम् । स पूर्वोक्तः । नायकः नेता प्रभुर्वा तस्य सम्बोधनं नायक । निष्ठायाः मोक्षावाप्तेः । च अयं चशब्दः पूर्वार्धे दृष्टव्यः । इष्टायाः प्रियायाः । अत्रास्मिन् । देहि दीयताम् । नः अस्मभ्यम् । न । येन । अशं दुःखम् । सितं बद्धम् । श्रेयः श्रेयणीयः सन् । सद्यः तत्क्षणादेव । सन्ना विनष्टा जरा वृद्धित्वं यस्यासौ सन्नजरः तस्य सम्बोधनं हे सन्नजर । अन्यैरजितः अजितः सन् । वान्तैःपदैः[1] सर्वत्र सम्बधनीयः । समुदायार्थः—यस्मिन् सर्वज्ञविशेषे प्राणिभिः स्तुतिमात्राद्वा पुष्पखण्डाद्वा पुण्यं भावितं सन् प्रशंसार्थं भवति यश्च राजितः । पुष्पदन्त इति उत्तर श्लोके तिष्ठति सोत्र सम्बन्धनीयः । स त्वं श्रेयः सन् हे पुष्पदन्त अज अस्मभ्यं शं देहि, येन सुखेन दुःखं सितं बद्धं न भवति तत्सुखं देहीत्युक्तं भवति ॥३८॥

अर्थ—जो अन्तरङ्ग और बहिरङ्ग लक्ष्मीसे शोभायमान हैं, जो सबके द्वारा सेव्य-सेवनीय हैं और जो (विश्वकी किसी अन्य शक्तिसे) अपराजित हैं—जीते नहीं जा सके हैं—ऐसे अत्यन्तश्रेष्ठ, जन्मरहित और सर्वप्रिय मोक्षलक्ष्मीके प्रसिद्ध

---

१ प्रथमान्तैः ।

नायक हे पुष्पदन्त जिनेन्द्र ! आपके विषयमें की गई मन वचन कायकी छोटी-छोटी चेष्टाओंसे—आपके चिन्तवन स्तवन तथा नमस्कारसे-प्राणियोंको जिस श्रेष्ठ पुण्यका बन्ध होता है वह मात्र अनुमानसे संभावित होनेपर भी स्तुतिके योग्य ठहरता है। हे प्रभो ! आप मुझे भी वह मोक्षसुख दीजिये जिससे फिर कभी वह सुख दुःख-बद्ध न हो—दुखको प्राप्त न हो।

भावार्थ–आपके स्तवनादिसे प्राणियोंको जो पुण्य-बन्ध होता है वह यद्यपि छद्मस्थ जीवोंके स्वानुभवगम्य नहीं होता—उन्हें उसका प्रत्यक्ष नहीं होता तथापि उस पुण्यबन्धसे जो कुछ सामग्री प्राप्त होती है उससे उसका अनुमान किया जा सकता है। यद्यपि इस अनुमान-प्रणालीसे पूर्ण पुण्यबन्धका बोध नहीं हो पाता तथापि जितने पुण्यबन्धका बोध होता है विचार करनेपर वह भी प्रशंसनीय ठहरता है। क्योंकि उससे भी अनेक ऐहिक तथा पारलौकिक फलोंकी प्राप्ति हो जाती है। हे भगवन् ! आपके विषयमें की गई मन-वचन-कायकी साधारण प्रवृत्तिसे जब जीवका इतना उपकार होता है तब मन-वचन-कायकी पूर्ण शक्ति लगाकर आपकी उपासना करनेसे जीवका कितना बड़ा उपकार न होगा ॥ ३७ ॥ ३८ ॥

(मुरजः)

शोकक्षयकृदव्याधे पुष्पदन्त स्ववत्पते ।
लोकत्रयमिदं बोधे गोपदं तव वर्त्तते ॥३९॥

शोकेति—शोकक्षयकृत् शोकस्य क्षयः शोकक्षयः तं करोतीति शोकक्षयकृत्। अव्याधे न विद्यते व्याधिर्यस्यासावव्याधिः तस्य सम्बोधनं हे अव्याधे। पुष्पदन्त नवमतीर्थकर। स्ववत्पते आत्मवतां पते। लोकानां त्रयम्। इदं प्रत्यक्षवचनम्। बोधे केवलज्ञाने। गोपदं गोष्पदम् अत्र सुपो लुक् भवति। तव ते वर्त्तते प्रवर्तते। ज्ञानस्य माहात्म्यं प्रद-

शितम् । गुणान्यावर्णनं हि स्तवः । किमुक्तं भवति हे पुष्पदन्त परमेश्वर तव बोधे लोकत्रयं गोष्पदं वर्त्तते यतः ततो भवानेव परमात्मा ॥३६॥

अर्थ—हे शोकका क्षय करनेवाले ! हे व्याधियोंसे रहित ! हे आत्मज्ञानियोंमें श्रेष्ठ ! पुष्पदन्त भगवान् ! आपके विश्व-प्रकाशी केवलज्ञानमें ये तीनों लोक गोष्पदके—कीचड़में चिह्नित हुए गायके खुरके—समान जान पड़ते हैं।

भावर्थ-हे प्रभो ! आपका ज्ञान विशाल समुद्रके समान है और यह लोकत्रय गोष्पदके समान अत्यन्त तुच्छ है। प्रमेय-पदार्थोंकी इयत्तासे आपके प्रमाण-ज्ञानकी इयत्ता नहीं आँकी जा सकती। आपका ज्ञान स्वभावसे अनन्त है, न कि अनंत पदार्थोंको जाननेसे ॥३६॥

(मुरवः)

लोकस्य धीर ते वाढं रुचयेपि जुषे मतम् ।
नो कस्मै धीमते लीढं रोचतेपि द्विषेमृतम् ॥४०॥

लोकेति - लोकस्य भव्यजीवानां । हे धीर गम्भीर । ते तव । वाढं अत्यर्थम् । रुचये दीप्तये । अपि भिन्नक्रमे । जुषे च प्रीतये । तादर्थ्ये अवियम् । मतं प्रवचनम् । नो प्रतिषेधवचनम् । कस्मैचित् जीवाय। धीमते च बुद्धिमते । लीढं आस्वादितम् । रोचते रुचिं करोति । अपि समुच्चयेऽर्थे । द्विषे विद्विषे । अमृतं षोडशभागः[1] । एतदुक्तं भवति—हे पुष्पदन्त धीर ते मतं लीढं लोकस्य रुचये जुषेपि वाढं रोचते । ननु धीमते रोचताम् । यावता हि यो द्वेष्टि तस्य कथं रोचते द्विषेपि अमृतं लीढं धीमते च । न कस्मै रोचते किन्तु रोचत एव ॥ ४० ॥

अर्थ—हे गम्भीरहृदय पुष्पदन्त भगवान् ! आपका यह पवित्र मत-आगम आस्वादन किये जानेपर—श्रवण पठन

[1] पाकः ।

चिन्तन आदि किये जानेपर—प्रत्येक को आपके भक्त और विद्वेषी दोनों प्राणियोंको—ज्ञानवृद्धि एवं प्रीतिका देने वाला है; क्योंकि अमृत आस्वादन किये जाने पर किस बुद्धिमान्को अच्छा नहीं लगता? भले ही वह उससे द्वेष रखता हो।

भावार्थ—अमृतसे चाहे कोई स्नेह रखे चाहे द्वेष, आस्वादन करनेपर वह जिस तरह सबको सुख पहुँचाता है उसी तरह कोई आपसे स्नेह करता हो चाहे विद्वेष, आपका आगम सबको सुख पहुँचाता है—सुखका रास्ता बतलाता है। उसका कारण आपकी धीरता-गम्भीरता और स्तुति-निन्दामें समानता है जिसे कि 'धीर' इस विशेषणसे आचार्य श्रीसमन्तभद्रने श्लोकमें अङ्कित किया है॥ ४० ॥

———

शीतल-जिन-स्तुतिः

(मुरजः)

एतच्चित्रं क्षितेरेव घातकोपि प्रसादकः।
भूतनेत्र पतेस्यैव[1] शीतलोपि च पावकः॥४१॥

एतदिति—एतत् प्रत्यक्षवचनम्। चित्रं आश्चर्यम्। क्षितेः पृथिव्याः। एव अप्यर्थं। घातकोपि हिंसकोपि। प्रसादकः प्रपालकः। भूतानां जीवानां नेत्रं चक्षुः भूतनेत्रं तस्य सम्बोधनं हे भूतनेत्र। पते स्वामिन्। असि भवसि। एव अत्यर्थं। शीतलः भव्याह्लादकः दशमतीर्थविधाता। अपि च तथापि। पावकः पवित्रः। विरुद्धमेतत् कथं शीतलः शीतलक्रियः पावकः अग्निः। यदि शीतलः कथं पावकः। अथ पावकः कथं शीतलः। यथा यो घातकः कथं प्रसादकः। अथ प्रसादकः कथं घातकः। विरुद्धमेतत्। एतदुक्तं भवति—हे भूतनेत्रपते क्षितेरेव आश्चर्यमेतत्। यो घातकोपि प्रसादकः। त्वं पुनः शीतलोपि च पावकः भवस्येव॥४१॥

---

[1] 'पते+असि+एव' इति पदच्छेदः।

अर्थ – हे प्राणिलोचन ! प्रभो ! यह आश्चर्यकी बात है कि आप पृथिवीके—पृथिवीगत प्राणियोंके (पक्षमें—ज्ञानावरणादि कर्मपुद्गलोंके)— घातक हो कर भी पालक हैं—रक्षक हैं—और शीतल—शीतगुण विशिष्ट—ठण्डे (पक्षमें—शीतलनाथ दशम तीर्थंकर) होकर भी पावक-अग्नि (पक्षमें—पवित्र करने वाले) हैं।

भावार्थ—इस श्लोकमें विरोधाभास अलंकार है अतः पहले इसमें विरोध मालूम पड़ता है परन्तु बादमें उसका परिहार हो-जाता है। जहां श्लेष इसका मूल होता है वहां विशेष चमत्कार उत्पन्न हो जाता है। यहां 'क्षिति' 'शीतल' और 'पावक' शब्द श्लिष्ट हैं। जो पृथिवीका घातक होगा वह पालक कैसे होगा ? यह विरोध है परन्तु परिहार पक्षमें क्षितिका अर्थ कर्मरूप पार्थिव—पुद्गलपरमाणु—लेनेसे विरोध दूर हो जाता है। इसी तरह जो शीतल—ठण्डा होगा वह पावक—अग्नि कैसे होगा ? यह विरोध है परन्तु शीतलका अर्थ दशमतीर्थंकर और पावकका अर्थ पवित्र करने वाले लेनेसे सब विरोध दूर हो जाता है। अथवा हे भगवन् ! 'आप घातक होकर भी प्रपालक हैं और शीतल होकर भी अग्नि हैं' यह 'विरोध' क्षितेरेव-पृथिवीवत् जड़ मनुष्योंको ही हो सकता है न तु विदुषाम्—विद्वानोंको नहीं ॥४१॥

(मुरजः)

कामभेत्य जगत्सारं जनाः स्नात महोनिधिम् ।
विमलात्यन्तगम्भीरं जिनामृतमहोदधिम् ॥४२॥

कामेति—काममत्यर्थं कमनीयं वा । एत्य गत्वा । जगत्सारं त्रिलोकसारम् । जनाः लोकाः । स्नात अज्ञानमलप्रक्षालनं कुरुध्वम् । महसां तेजसां[1] निधिः अवस्थानं यः सः अतस्तं महोनिधिम् । विमलः

---

1 'महस्तूत्सवतेजसोः' इति विश्वलोचनः ।

निर्मलः अत्यन्तः अपर्यन्तः गम्भीरः अगाधः यः सः विमलात्यन्तगम्भीरः अतस्तं विमलात्यन्तगम्भीरम् । जिन एव अमृतमहोदधिःक्षीरसमुद्रः जिनामृतमहोदधिः अतस्तं जिनामृतमहोदधिम् । एतदुक्तं भवति—यतः एवंभूतः शीतलभट्टारकः ततस्तं शीतलं जिनामृतमहोनिधिं विमलं अत्यन्तगम्भीरं हे जना एत्य गत्वा स्नात कामम् ॥४२॥

अर्थ - हे भव्यजीवो ! तुम उस जिनेन्द्ररूपी क्षीरसमुद्रको प्राप्त कर यथेष्ट स्नान करो—कर्ममलको धोकर अपने आपको पवित्र बनाओ—जो कि तीनों लोकोंमें श्रेष्ठ है, उत्सव अथवा तेजका स्थान है, विमल है—कर्ममल और कर्दम आदिसे रहित है, अत्यन्त है - विनाश-रहित और पार-रहित है, तथा गम्भीर है—धीरवीर और गहरा है।

भावार्थ—इस श्लोकमें रूपकालंकारसे जिनेन्द्रदेव और क्षीर-समुद्रमें अभेद किया गया है। इसके जो विशेषण दिये गये हैं वे प्रायः श्लेषमय होनेसे दोनोंके—जिनेन्द्र और क्षीरसमुद्रके — पक्ष-में ठीक ठीक बैठ जाते हैं। यथा—जिस प्रकार जिनेन्द्रदेव तीनों लोकोंमें सारभूत हैं उसी तरह क्षीरसमुद्र भी सारभूत है। जिनेन्द्रदेव जिस प्रकार अनन्त ज्ञान, अनन्त पराक्रम आदि तेजके भण्डार हैं उसी तरह क्षीरसमुद्र भी देवकृत अनेक उत्सवोंका भण्डार है। जिनेन्द्रदेव जिस तरह कर्ममलसे रहित होनेके कारण विमल हैं उसी तरह क्षीरसमुद्र भी कर्दम-शैवाल आदि मलके न होनेसे विमल है। जिस तरह जिनेन्द्र देव अन्तसे रहित हैं उसी तरह क्षीरसमुद्र भी अन्तसे-पारसे रहित है—अत्यन्त विस्तृत है। और जिनेन्द्रदेव जिस प्रकार गम्भीर हैं--रागद्वेषसे रहित होनेके कारण धीरवीर हैं—उसी तरह क्षीरसमुद्र भी गंभीर है—गहरा है। इस जिनेन्द्र रूपी भव्य क्षीरसमुद्र में स्नान करनेसे--भक्तिपूर्वक उनका ध्यान, करनेसे—सब कर्ममल नष्ट हो जाते हैं। इसीलिये आचार्यने भव्य

जीवोंको इस अनुपम क्षीरसागरमें स्नान करनेका आदेश दिया है ॥४२॥

श्रेयोजिन-स्तुतिः

(अर्द्धभ्रमनिरौष्ठ्यगूढचतुर्थपादः)

हरतीज्याहिता तान्ति रक्षार्थायस्य नेदिता।
तीर्थादि श्रेयसे नेताज्यायः श्रेयस्ययस्य हि ॥४३॥

हरतीति--अर्द्धेन भ्रमति यतः औष्ठ्याक्षरमपि न विद्यते सर्वत्र चतुर्थपादाक्षराणि च सर्वेषु पादेषु सन्ति ततो भवत्ययं एवंगुणः।

हरति विनाशयति। इज्या पूजा। आहिता कृता। तान्ति खेदं क्लेशं दुःखम्। रक्षार्था पालनार्था, आयस्य प्रयस्य यत्नं कृत्वा। नेदिता समीपीकृता अन्तिकस्य णिचि कृते नेदादेशस्य रूपमेतत् क्तान्तस्य। शीतलतीर्थविच्छेदे उत्पन्नो यतः ततः तीर्थादिः संजातः तस्य सम्बोधनं हे तीर्थादे। श्रेयसे अभ्युदयाय। नेता नायकः। अज्यायः वृद्धत्व-हीनः। श्रेयसि एकादशतीर्थकरे त्वयि। अयस्य पुण्यस्य। हि यस्मात्। एतदुक्तं भवति--हे तीर्थादे अज्यायः त्वयि श्रेयसि आहिता इज्या रक्षार्था प्रयस्य पुण्यस्यान्तिका श्रेयोर्था इह लौकिकार्था तान्ति दुःखं हरति। यतस्ततस्त्वं नेता नायक एव नान्यः। उत्तरश्लोकयानि विशे-षणानि तान्यत्रैव द्रष्टव्यानि ॥४३॥

अर्थ—हे तीर्थके आदिमें होनेवाले[2]! जरारहित! श्रेयान्सनाथ भगवन्! प्रयत्नपूर्वक समीपीकृत तथा मन वचन काय-की एकाग्रतामें की गई आपकी पूजा सांसारिक सन्तापको

---

१ यह श्लोक अर्धभ्रम है, इसमें ओष्ठस्थानीय वर्ण नहीं हैं और चतुर्थपादके समस्त अक्षर तीन पादोंमें गूढ़ हैं।

२ भगवान् शीतलनाथके तीर्थके अन्तिम समयमें तीर्थ-धर्मका विच्छेद हो गया था उसके बाद श्रेयान्सनाथका जन्म हुआ था। इसलिये उन्हें तीर्थके आदिमें होने वाला कहा है।

हरती है, पुण्यकी रक्षा करती है और अनेक कल्याण प्राप्त कराती है; अतः आप ही जगत्के सर्वश्रेष्ठ नायक हैं ॥४३॥

(अर्द्धभ्रमः)

अविवेको न वा जातु विभूषापन्मनोरुजा ।
वेशा मायाज वैनो वा कोपयागश्च जन्म न ॥४४॥

अविवेकेति—त्वयि श्रेयसि इत्यनुवर्त्तते । अविवेकः अनालोचनम् । न प्रतिषेधवचनम् । वा समुच्चये । जातु कदाचित् । विभूषा शरीरालंकारः । आपत् विपत् महासंक्लेशः । मनोरुजा चित्तपीड़ा । वेषा शरीरविन्यासः । माया वंचना । हे अज सर्वज्ञ । वा समुच्चये । एनो वा पापं वा । कोपः क्रोधः हिंसापरिणामः । आगश्च अपराधश्च । जन्म उत्पत्तिः । न प्रत्येकमभिसम्बन्धनीयः । किमुक्तं भवति—हे श्रेयन् अस्मिन् त्वयि अविवेको न कदाचिदभून, विभूषा वा न, आपद्वा न, मनोरुजा वा न, वेषा वा न, माया वा न, हे अज एनो वा न, कोपः आगश्च जन्म च न, यतः यतः ततो भवानेव नेतेति सम्बन्धः । अविवेको नास्तीति वचनेन सांख्य-सौगत-यौगानां निराकरणं कृतम् । अन्यैर्विशेषणैरन्ये निराकृताः ॥ ४४ ॥

अर्थ—हे सर्वज्ञ ! (सर्वज्ञ अवस्था प्राप्त होनेपर) आपमें कभी अज्ञान नहीं था, आपके शरीरपर कभी आभूषण न थे तथा आपत्ति—शारीरिक व्यथा, मानसिक व्यथा, तरह तरहके वेष, छलकपट, पाप, क्रोध, अपराध तथा जन्म आदि कभी नहीं थे इस कारण आप ही सबके नायक हैं ।

भावार्थ—सांख्य, बौद्ध तथा नैयायिक ईश्वरको ज्ञानस्वरूप नहीं मानते किन्तु ज्ञानगुणका आधार मानते हैं अतः उनका निराकरण करनेके लिये कहा गया है कि आपमें अविवेक कभी नहीं था—आप हमेशा ज्ञानस्वरूप रहते हैं । कितने ही मतावलम्बी अपने देव-देवताओंको तरह तरहके आभूषण, वेषविन्यास,

तथा शत्रुको मारनेके लिये चिन्ता छल कपट क्रोध पापाचार एवं अनेक प्रकारके अस्त्र-शस्त्रोंका धारण करना मानते हैं। कुछ लोग यह भी मानते हैं कि हमारे ईश्वर एक बार मुक्त हो चुकने पर भी असत् पुरुषोंके निग्रहके लिये, सज्जनोंके उपकारके लिये और सद्धर्मकी स्थापनाके लिये पुनर्जन्म होते हैं—फिरसे संसारके दुःखोंको प्राप्त होते हैं[1]। इसलिये श्लोकगत अन्य समस्त विशेषणोंसे उनका निराकरण हो जाता है ॥ ४४ ॥

(मुरजः)

आलोक्य चारु लावण्यं पदाल्लातुमिवोर्जितम् ।
त्रिलोकी चाखिला पुण्यं मुदा दातु ध्रुवोदितम् ॥४५॥

आलोक्येति—आलोक्य दृष्ट्वा । चारु शोभनम् । लावण्यं सारूप्यं सौभाग्यम् । पदात् पादात् । लातुं ग्रहीतुम् । इव औपम्ये । ऊर्जितं महत् । त्रयाणां लोकानां समाहारः त्रिलोकी । च अत्यर्थे । अखिला निरवशेषा । पुण्यं शुभम् । मुदा हर्षेण । दातु दत्तम् । ध्रुवोदितं नित्योद्गतम् । श्रेयसोऽत्यनुवर्त्तते । किमुक्तं भवति—यस्य श्रेयसो भट्टारकस्य पादात् त्रिलोकी अखिला आलोक्य लावण्यं किं विशिष्टं पुण्यं दातु ध्रुवोदितमिवोर्जितं लातामिव ननाम इति सम्बन्धः । भट्टारकस्त्वं मा अव इत्युत्तरसम्बन्धः ॥ ४५ ॥

---

१ 'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥६॥
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥७॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥८॥
—गीता, चतुर्थ अध्याय ४ श्लोक ६, ७, ८ ।

अर्थ—हे प्रभो! हर्षपूर्वक पुण्य प्रदान करनेके लिये हमेशा प्रकाशमान और विस्तृत आपके चरणकमलोंके मनोहर सौन्दर्यको देखकर उनसे उसे लेने के लिये ही मानों ये तीन लोकके जीव आपको नमस्कार करते हैं[1]।

भावार्थ—भव्यजीव लोकोत्तर सौन्दर्यसे आकृष्ट होकर जिनेन्द्रदेवके चरणोंमें जो अपना मस्तक झुकाते हैं सो मानों वे उनके चरणकमलोंका सौन्दर्य लेनेके लिये ही उन्हें नमस्कार करते हैं। यह उत्प्रेक्षालंकार है। ॥ ४५ ॥

(श्लोकयमकः)

अपराग समाश्रेयन्ननाम यमितोभियम्।
विदार्य सहितावार्य समुत्सन्नज वाजितः ॥४६॥
अपराग स मा श्रेयन्ननामयमितोभियम्।
विदार्यसहितावार्य समुत्सन्नजवाजितः ॥४७॥

(युग्मं)

अपरागेति—अपराग वीतराग। समाश्रेयं सम्यगाश्रेयम्। ननाम नौतिस्म। त्रिलोकी इति सम्बन्धः। यं भट्टारकं। इतः प्राप्तः। भियं भीतिम्। विदार्य प्रभिद्य। सह हितेन वर्त्तन्ते इति सहिता. तैरावार्य्यः परिवेष्टितः सहितावार्यः तस्य संबोधनं हे सहितावार्य। सम्यग् मुत् हर्षः यस्यासौ समुत्। सन् भवन्। हे अज सर्वविन। वाजितः कंटकिनः। किमुक्तं भवति—यस्य पादान् त्रिलोकी लावण्यं लातुमिव यं ननाम। यं वा भव्यजनः इतः भयं विदार्य सहर्षः सन् वाजितः कंटकितः पुलकित-शरीरो भवति स त्वं मा अव इत्युत्तरत्र सम्बन्धः ॥ ४६ ॥

अपरागेति—पराग: संपरायः। न विद्यते परागो यस्यासावपरागः तस्य सबोधनं हे अपराग। स त्वं। मा अस्मान्। हे श्रेयन् एकादशती-

1 'ननाम' इत्युत्तरश्लोकगत-क्रियया सम्बन्धः

र्थंकर । आमयः व्याधिः, न विद्यते आमयो यस्यासावनामयः तं अनामयं, मा इति सम्बन्धः । इतः इतः प्रभृति । अभियं अभयम् । विद् ज्ञानम्, आर्याः साधवः; तै सहितः युक्तः विदार्यसहितः तस्य विदः ज्ञानिनः सम्बोधनं हे विदार्यसहित । अव रक्ष । आर्य पूज्य । समुत्सन्नजव । आजितः संग्रामात् कलहात् प्रणयसंग्रामाद्वा । किमुक्तं भवति—स एवं विशिष्टः त्वं हे श्रेयन् इतः प्रभृति अनामयं अभियं मा रक्ष आजितः समुत्सन्नजव अपराग ॥ ४७ ॥

अर्थ—हे वीतराग ! हे सर्वज्ञ ! आप सुर, असुर, किन्नर आदि सभीके लिये आश्रयणीय हैं—सेव्य हैं—सभी आपका ध्यान करते हैं, आप सबका हित करने वाले हैं अतः हिताभिलाषी-जन सदा आपको घेरे रहते हैं—आपकी भक्ति वन्दना आदि किया करते हैं । आपकी शरणको प्राप्त हुए भक्त पुरुष भयको नष्ट कर—निर्भय हो, हर्षसे रोमाञ्चित हो जाते हैं । आप परागसे—कषाय-रजसे-रहित हैं । ज्ञानवान् श्रेष्ठ पुरुषोंसे सहित हैं, पूज्य हैं, तथा रागद्वेषरूप संग्रामसे आपका वेग नष्ट होगया है—आप रागद्वेषसे रहित हैं । मैं आपके दर्शन मात्रसे ही आरोग्यता और निर्भयताको प्राप्त हो गया हूं । हे श्रेयान्स देव ! मेरी रक्षा कीजिये ॥ ४६ ॥ ४७ ॥

वासुपूज्य-जिन-स्तुतिः

(अनन्तरपादमुरजबन्धः)

अभिषिक्तः सुरैर्लोकैस्त्रिभिर्भक्तः परैर्न कैः ।
वासुपूज्य मयीशेशस्त्वं सुपूज्यः क ईदृशः ॥ ४८ ॥

अभीति—प्रथमद्वितीययोस्तृतीयचतुर्थयोः पादयोः मुरजबन्धो द्रष्टव्यः ।

अभिषिक्तः मेरुमस्तके स्नापितः । सुरैः देवैः । लोकैस्त्रिभिः भवन-

वासिमनुष्यदेवेन्द्रैः। भक्तः सेवितः। परैरन्यैः कैर्न सेवितः किन्तु सेवित एव। हे वासुपूज्य द्वादशतीर्थंकर। मयि विषये मम वा। ईशानामीशः ईशेशः त्वं। सुष्ठु पूज्यः सुपूज्यः। क ईदृशः युष्मत्समानः अन्यः क इत्यर्थः। एतदुक्तं भवति—हे वासुपूज्य यः लोकैः त्रिभिः अभिषिक्तः भक्तश्च सः अन्यैः कैर्न भक्तः सेवितश्च ततो मयि मम त्वमेव ईशेशः अन्यः ईदृशः सुपूज्यः कः यः अस्माकं स्वामी भवेत् ॥ ४८ ॥

अर्थ—हे प्रभो! जब देवोंने (मेरु पर्वतपर ले जाकर) आपका अभिषेक किया और भवनवासी, व्यन्तर, ज्योतिष्क, मनुष्य, तिर्यञ्च आदि तीनों लोकोंके जीवोंने आपकी सेवा की तब ऐसा कौन होगा जो आपकी सेवा न करे? हे वासुपूज्य! आप मेरे विषयमें ईश्वरोंके ईश्वर हैं—मेरे लिये सर्वश्रेष्ठ ईश्वर आप ही हैं—अतः आप ही पूजनीय हैं। आप जैसे अर्हत्पुरुष से भिन्न और कौन है जो मेरा स्वामी हो सके ॥ ४८ ॥

(मुरजः)

चार्वस्यैव क्रमेजस्य तुंगः सायो नमन्नभात्।
सर्वतो वक्त्रमेकास्यमंगं छायोनमप्यभात् ॥४९॥

चार्वेति—चारु शोभनम्। अस्यैव क्रमे पादे। अजस्य सर्वज्ञस्य। तुंगः महान्। सायः सपुण्यः। नमन् स्तुतिं कुर्वन्। अभात् शोभते स्म। विरुद्धमेतत्। नमन् सन् कथं तुंगः। अस्य पुनरजस्य नमन्नपि तुंगः। अतः एवकारः अत्रैव। सर्वतः समंततः। वक्त्रं मुखं। एकमास्यं यस्याङ्गस्य तदेकास्यं एकमुखम्। अङ्गं शरीरम्। छायया ऊनं छायोनं छायारहितम्। अच्छायत्वं ज्ञापितं भवति। छायोनमपि अभात् शोभतेस्म। विरुद्धमेतत्—एकास्यमंगमपि सर्वतो वक्त्रं यद्येकास्यं कथं सर्वतो वक्त्रं, अथ सर्वतो वक्त्रं कथमेकास्यम्। एतदपि विरुद्धम्—यदि छायोनं कथमभात्, अथाभात् कथं छायोनम्। अन्यत्र विरुद्धं अस्य पुनः सर्वज्ञस्य न

विरुद्धम् । घटत एव सर्वं यतश्च विरुद्धालंकृतिरियम् । किमुक्तं भवति—अनेन व्याजेन माहात्म्यं प्रदर्श्यास्य स्तवनं कृतं भवति ॥ ४६ ॥

अर्थ—इन सर्वज्ञ वासुपूज्य स्वामीके चरणकमलोंमें नमस्कार करनेवाला पुरुष निश्चयसे पुण्यवान् और उच्च होता हुआ अत्यन्त शोभायमान होता है। इनका शरीर यद्यपि एक मुखवाला है तथापि उसमें चारों ओरसे मुख दिखाई देते हैं—वह चतुर्मुख है तथा छाया-कान्ति से (पक्षमें परछाईं से) रहित होकर भी अत्यन्त शोभायमान होता था।

भावार्थ—इस श्लोकमें विरोधाभास अलंकार है—'जो चरणोंमें नम्र होता है वह उच्च नहीं होता और जो उच्च होता है वह किसीके चरणों में नम्र नहीं होता'—यह लोकगतविरुद्ध बात है, परन्तु भगवान् वासुपूज्य लोकोत्तर पुरुष हैं उनमें लोकगत विरोध स्थान नहीं पा सकता—उनके चरणोंमें नमस्कार करनेवाला पुरुष निश्चित ही सातिशय पुण्य बन्धकर उच्च पद पाता है।

'जिसके एक मुख होगा वह सामनेसे ही दिखाई देगा-चारों ओर से नहीं, परन्तु भगवान् वासुपूज्यके एकमुख होकर भी सब ओरसे दिखाई देता था'—यह विरुद्ध बात है; परन्तु यह विरोध भी उनमें लागू नहीं होता क्योंकि केवलज्ञानके कालमें होनेवाले अतिशयविशेषसे उनका मुख चारों ओरसे दिखाई देता है।

'जो शरीर छायासे रहित होता है वह शोभित नहीं होता, परन्तु भगवान् वासुपूज्य का शरीर छायासे रहित होकर भी अत्यन्त शोभायमान होता था'—यह विरुद्ध बात है परन्तु उसका परिहार निम्न प्रकार है—यहां छाया शब्द के दो अर्थ हैं—कान्ति[2] और प्रतिबिम्ब। उनमें प्रथम कान्ति अर्थसे विरोध आता है और द्वितीय प्रतिबिम्ब अर्थसे उसका परिहार

२ 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरः ।

होजाता है। भगवान्के शरीरकी परछाइँ नहीं पड़ती फिर भी वह कान्तिसे अत्यन्त सुन्दर होता है ॥ ४६ ॥

विमल-जिन-स्तुति

(इष्टपादमुरजबन्धः)

[1]क्रमतामक्रमं क्षेमं धीमतामर्च्यमश्रमम् ।
श्रीमद्विमलमर्चेमं वामकामं नम क्षमम् ॥५०॥

क्रमेति—क्रमतां अप्रतिबन्धेन व्रजत् । व्रजतां वा । अक्रमं युगपत् । क्षेमं कुशलं सुखम् । धीमतां बुद्धिमताम् । कर्त्तरि ता । अर्च्यं पूज्यम् । अश्रमं श्रमरहितं अक्लेशम् । श्रीमांश्चासौ विमलश्च श्रीमद्विमलः अतस्तं श्रीमद्विमलं परमतीर्थंकरं त्रयोदशम् । अर्च क्रियापदं लोडन्तम् । इमं प्रत्यक्षवचनम् । वामैः प्रधानैः काम्यते इष्यते इति वामकामः अतस्तं वामकामम् । नम च चशब्दोऽनुक्तो द्रष्टव्यः । क्षमं समर्थं क्रोधादिरहितमित्यर्थः । एतदुक्तं भवति—श्रीमद्विमलं सर्वविशेषणविशिष्टं अर्च नम च धीमतामर्च्यं क्षेमं क्रमतां अक्रमं सर्वेषां प्रणामादेव शान्तिर्भवति ॥ ५० ॥

अर्थ—हे भव्यजनो ! जो एक साथ सब पदार्थोंको जानते हैं, मंगलरूप हैं, बुद्धिमानोंके पूज्य हैं, खेदरहित हैं, अनन्त शक्तिसे सहित हैं और इन्द्र चक्रवर्ती आदि प्रधान पुरुष जिनकी सेवा करनेकी इच्छा करते हैं ऐसे अन्तरंग बहिरंग लक्ष्मीसे सहित इन विमलनाथ तीर्थंकरको पूजो तथा नमस्कार करो और उसके फलस्वरूप तत्क्षण उस कुशल अथवा सुखको विना किसी रुकावटके प्राप्त करो जो कि बुद्धिमानोंके द्वारा पूज्य है, परिश्रमसे रहित है और बड़े बड़े पुरुष जिसकी निरन्तर चाह रखते हैं।

१ लोडन्तप्रयोगः 'वृत्तिसर्गतापनेषु क्रमः' (१।३।३८ अष्टाध्यायी) इत्यात्मनेपदम् । वृत्तिरप्रतिबन्धः ।

भावार्थ—संसारमें दुःख प्राप्तिके मुख्य दो कारण हैं एक कषाय और दूसरा अज्ञान। हमारे आराध्यदेव वीतराग हैं—कषायरहित हैं और सर्वज्ञ भी हैं—अज्ञानसे रहित हैं अर्थात् दुःखके दोनों कारणोंसे रहित हैं—अनन्त-सुख-सम्पन्न हैं। जो भव्यजीव सच्चे हृदयसे उनकी भक्ति करता है वह भी तद्रूप होनेसे तत्कालमें सुखका अनुभव करने लगता है। अतः इस श्लोकमें आचार्य समन्तभद्रने सुखाभिलाषी जीवोंको सुख-प्राप्तिका उपाय बतलाया है। वह यही कि भगवान् विमलनाथ-को पूजो और नमस्कार करो। ॥ ५० ॥

(द्व्यक्षरपादाभ्यासयमकः[1])

ततोमृतिमतामीमं तमितामतिमुत्तमः ।
मतोमातातिता तोत्तुं तमितामतिमुत्तमाः ॥५१॥

ततोमृतीति—द्वितीयपादोऽभ्यस्तः पुनरुक्तः तकारमकारयोरेवास्तित्वं नान्येषाम्। यतस्ततो भवत्ययं द्व्यक्षरपादाभ्यासयमकः।

विमल इत्यनुवर्त्तते। ततस्तस्मादहं विमलं अमृतिं मरणवर्जितम्। अतामि सततं गच्छामि। इमं प्रत्यक्षवचनम्। तमिता विनाशिता अमतिः अज्ञानं येनासौ तमितामतिः तं तमितामतिम्। उत्तमः प्रधानः यतस्त्वमिति सर्वत्र सम्बन्धः। मतः पूजितः। अमाता अहिंसकः। अतिता सततगतिरर्हन्निति सम्बन्धः। तोत्तुं प्रेरितुम्। तमितां अक्षमस्व रूपम्। अति पूजा मुत् हर्षः यस्यासौ अतिमुत्, सर्वे इमे अतिमुदः, एतेषां मध्ये अयमतिशयेन अतिमुत् अमुत्तम. किमुक्तं भवति—यतो भवतः प्रणामात्क्षमः क्षेमं क्रमते स्तोतृणाम् ततोऽहमुत्तमः सन् अति-

---

[1] यह श्लोक सिर्फ 'त' और 'म' इन दो अक्षरोंसे बनाया गया है तथा इसका दूसरा और चौथा पाद एक समान हैं इसलिये इसमें व्यंजन-चित्र और यमक अलंकार है।

मुत्तमः सन् मतः अमाता अतिताहं तान्तु तमितां क्लेशितुं अता म विमलं अमृतिम् ॥५१॥

अर्थ—जब कि पूजा और नमस्कार करनेसे भव्य पुरुषोंको तत्क्षणमें अनेक कल्याण प्राप्त होते हैं—उनका संसार-भ्रमण तक रुक जाता है, तब मैं भी अपने दुःखोंको नष्ट करने के उद्देश्यसे अत्यन्त हर्षित होता हुआ मृत्युरहित और समस्त अज्ञानको नष्ट करनेवाले उन विमलनाथ स्वामीकी शरणमें जाता हूं—उनकी पूजा और वन्दना करता हूं जोकि सर्वोत्तम हैं, सर्वपूजित हैं, और परम अहिंसक हैं तथा मैं इसके विपरीत चतुर्गतिरूप-संसारमें भ्रमण करनेवाला हूँ ॥५१॥

(चक्रश्लोकः)

(अक्षरद्वयविरचितसमुद्गयमकः)

नेताननतनुते[1]नेनोनितान्तं नाततो नुतात् ।
नेता न तनुते नेनो नितान्तं ना ततो नुतात्[2] ॥५२॥

नेतेति—यादृग्भूतं पूर्वार्द्धं पश्चार्द्धमपि तादृग्भूतमेव । तकारनकारयोरेवास्तित्वं नान्येषाम् । अतः एवंभूतः।

न प्रतिषेधः । इनान् प्राणान् । अतनुते अशरीरित्वे (तलन्तं) तस्य विकल्पेन आडागमः । न विद्यते एनः पापं यस्यासौ अनेनाः तस्य सम्बोधनं हे अनेनः । अनितान्तं क्लेशरहितं यथा भवति । न अततः

१ 'अतनुते' इतिच्छेदः । तनोर्भावः कर्म वा तनुता, अविद्यमाना तनुता यस्मिन् तस्मिन् अतनुते अशरीरित्वे—सिद्धत्वपर्याये इत्यर्थः । समासे सति 'गोस्त्रियोरुप सर्जनस्य' इत्युपसर्जनह्रस्वत्वे सत्यकारान्तं रूपम् । यत्तु संस्कृतटीकायां तलन्तस्य अतनुता शब्दस्य विकल्पेन आडागम उक्तं तच्चिन्त्यं, तलन्तस्य नित्यस्त्रीलिङ्गत्वात् ।

२ 'नुतात्' इत्यत्र भावे क्तः । नमस्कारादित्यर्थः ।

न सदा गच्छतः पूर्वोपि न शब्दः अत्रैवाभिसम्बन्धनीयः तेन किमुक्तं भवति—न न अततः अतत एव। द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः। नुतात् प्रणुतात्। नेता नायकः। न तनुते महान् संपद्यते, न अत्रापि पूर्ववत् सम्बन्धः। न न तनुते किन्तु तनुत एव। इनः स्वामी सन्। नितान्तं अत्यर्थं। ना पुरुषः। ततः तस्मात्। नुतात् नुयात्। तात-इन्तं क्रियापदम्। किमुक्तं भवति—इतान् प्राप्तान् न न अतत: संसारिणः अतनुते अशरीरित्वे सिद्धत्वे तनुते विस्तारयति नायकः स्वामी यः प्रणामाद्धेतोः। अतः तं ना नुतात्॥५२॥

अर्थ—हे पापरहित! विमलनाथ जिनेन्द्र! आप शरणमें आये हुये संसारी प्राणियोंको विना किसी क्लेशके शरीररहित अवस्था—सिद्धत्व पर्याय—प्राप्त करा देते हैं तथा आपको नमस्कारकरनेसे प्राणी सबका स्वामी और नायक होजाता है। अतः हे भव्यजनों! ऐसे इन विमलनाथ स्वामीको तुम भी नमस्कार करो।

भावार्थ—आपको नमस्कार करनेवाले मानव अरहन्त-अवस्था प्राप्त कर सबके स्वामी और नायक बनते हैं और अन्तमें पाप से—कर्ममलसे—रहित होकर सिद्धत्व पर्यायको पा लेते हैं, इसलिये आचार्य समन्तभद्रने भव्य जीवोंको आपकी भक्ति करनेके लिये प्रेरित किया है ॥५२॥

(चक्रश्लोकः)

नयमानक्षमामान न मामार्यार्त्तिनाशन।
नशनादस्य[1] नो येन नये[2] नोरोरिमाय[3] न ॥५३॥

---

१ 'अस्य' इति 'असु प्रक्षेपे' इत्यस्य दैवादिकस्य धातोर्लोट् मध्यमपुरुषैकवचनस्य रूपम्। १—२ न नो नये न न अरिमाय इत्युभयत्र प्रतिषेधवाचकौ द्वौ नञ् शब्दौ प्रकृतार्थं दृढयतः। अयं श्लोकोऽलंकारचिन्तामणौ द्वितीयपरिच्छेदे चित्रालंकारस्यावान्तरभेदस्य पादोत्तरजातेरूदाहरणरूपेणोपन्यस्तः। तथाहि—

नयमेति — नयमानक्षम पूज्यमानक्षम नयमाना क्षमा यस्यासौ नयमानक्षमः तस्य सम्बोधनं हे नयमानक्षम । न विद्यते मानं उद्धृतिः परिमाणं वा यस्यासावमानः तस्य सम्बोधनं हे अमान । न प्रतिषेधवचनम् । मां अस्मदः इबन्तस्य रूपम् । आर्याणां साधूनां अर्त्तिः पीडा तां नाशयतीत्यार्यार्त्तिनाशनः कर्तरि ल्युट् बहुलवचनात् । ततः हे आर्यार्त्तिनाशन । नशनात् विनाशात् जातिजरामरणेभ्यः इत्यर्थः । अस्य उत्सारय । असु क्षेपणे इत्यस्य धोः लोडन्तस्य रूपम् । नो प्रतिषेधः । येन कारणेन नये पूजामहं लभे संमाननेयं विधिः । न नो प्रतिषेधवचने अत्र सम्बन्धनीये । न नो नये किन्तु नये एव । द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः । न प्रतिषेधे । हे उरो महन् । अरिमाय अरिहिंसक । अरीन् अन्तः शत्रून् मिनाति हन्तीति अरिमायः ततः हे अरिमाय । पूर्वोक्तोऽपि न अत्र सम्बन्धनीयः । हे न न अरिमाय । किमुक्तं भवति — हे नयमानक्षम अमान आर्यार्तिनाशन न न अरिमाय मां विनाशात् अस्य अपनय । येन न नो नये अहं । येन पूजामहं लभे इत्यर्थः ॥ ४३ ॥

नयप्रमाणसम्बुद्धिः शमः का श्रीमुखेऽपि सा ।
किं निषेधेऽव्ययं लोक-नाशिनो दुःखि किं कुलम् ॥७३॥
कः पुमानन्न सम्बुद्धिः का च नश्वरनिःस्वने ।
कोटि किं पदमस्माकमित्यर्थे केन नाश्यते ॥७४॥
वस्त्वंशो बुध्यते केन वृक्षश्चक्रं रमा च का ।
सम्बरमराद्ध सम्बुद्धिः का कथं जिन ईड्यते ॥७५॥
नयमान क्षमामान नमामार्यार्त्तिनाशन ।
नशनादस्य नो येन नये नारोरिमाय न ॥७६॥

नयमान । क्षमा । मानन—लक्ष्मीमुख । मा । मारी । आर्त्ति-अर्तध्यानमस्यास्तीति । ना । अशन । नशनाद नश्यतीति नशस्तस्यनाद । स्य—षोऽन्तकर्मणीति धातोर्मध्यमपुरुषः । नः । येन—यमेन । नयेन । उरः । अरि—अराः सन्त्यस्मिन्निति । मा अयन । कथं जिन ईड्यते इति प्रश्नस्य सर्वश्लोकार्थः ।

अर्थ—हे प्रशंसनीय क्षमासे युक्त। हे अहंकार-शून्य! हे साधुपुरुषोंकी पीड़ाको नष्ट करनेवाले! हे कर्मशत्रुओंके घातक! हे सर्वश्रेष्ठ! विमलनाथ स्वामिन्! आप मुझे इस जन्ममरण-रूप विनाशसे दूर कीजिये—मेरे जन्म-मरणके दुःख नष्ट कीजिये, जिससे मैं भी (आपकी तरह) उत्तम स्थानको—स्वात्मस्थितिरूप निर्वाणपदको—प्राप्त हो सकूँ ॥५३॥

(गूढस्वेष्टपादचक्रश्लोकः[1])

वर्णभार्यातिनन्द्याव[2] वन्द्यानन्त सदारव।
वरदातिनतार्यार्व वर्यातान्तसभार्णव ॥५४॥

वर्णेति—आत्मनः इष्टं पादः सोऽन्येषु पादेषु गुप्यते यतः। वर्णेन शरीरप्रभया भाति शोभते इति वर्णभः शरीरकान्त्युत्कट इत्यर्थः तस्य सम्बोधनं हे वर्णभ। आर्य पूज्य। अतिनन्द्य सुष्ठुसमृद्ध। अव रक्ष। लोडन्तस्य रूपं क्रियापदम्। वन्द्य देवासुरैरभिवन्द्य। हे अनन्त चतुर्दशतीर्थंकर। सत् शोभनः आरवः वाणी सर्वभाषात्मिका यस्यासौ सदारवः तस्य सम्बोधनं हे सदारव। वरद इष्टद कामदायक। अति शोभनं नताः प्रणताः अतिनताः अतिनताश्च ते आर्याश्च अतिनतार्याः तान् अवति रक्षतीति अतिनतार्यावः तस्य सम्बोधनं हे अतिनतार्याव। वर्य प्रधान। सभा एव अर्णवः समुद्रः सभार्णवः अतान्त अखिभिन्नः अक्षुभितः सभार्णवः समवसृतिसमुद्रः यस्यासौ अतान्तसभार्णवः तस्य सम्बोधनं हे अतान्तसभार्णव। किमुक्तं भवति—हे अनन्त वर्णभादिविशेषणविशिष्ट अव पालय मामिति सम्बन्धः। अन्यांश्च पालय ॥५४॥

अर्थ—हे अनुपम सौन्दर्यसे शोभायमान! हे अष्ट महा-

---

[1] इसश्लोकमें स्वेष्ट—मन चाहा—पाद शेष तीन पादोंमें गूढ़ है तथा चक्रवद्ध नामक चित्रालंकार भी है।

[2] वर्णभ+आर्य+अतिनन्द्य+अव इति पदच्छेदः। अव रक्षेति क्रियापदम्।

प्रातिहार्यरूप विभूतिसे सम्पन्न! हे सुर-असुरोंके द्वारा वन्द-नीय! हे उत्तम दिव्यध्वनिसे सहित! हे इच्छित पदार्थोंके देने वाले! हे अत्यन्त नम्र साधुपुरुषोंके रक्षक! हे श्रेष्ठ! हे क्षोभ-रहित! समवसरण-समुद्रसे संयुक्त! अनन्तनाथजिनेन्द्र! मेरी रक्षा कीजिये—मुझे संसारके दुःखोंसे बचाइये ॥५४॥

अनन्त-जिन-स्तुतिः

(गूढद्वितीयतृतीयान्यतरपादद्व्यक्षरमयश्लोकः)

नुन्नानृतोन्नतानन्त नूतानीतिनुताननः ।
नतोनूनोनितान्तं ते नेतातान्ते निनौति ना ॥५५॥

नुन्नेति—द्वितीयतृतीयान्यतरपादो गुप्यते नकारतकारयोरेवास्तित्वं नान्येषां यतः ।

नुन्नं क्षिप्तं अनृतं असत्यं येनासौ नुन्नानृतः तस्य सम्बोधनं हे नुन्नानृत अनेकान्तवादिन् । उन्नत महन् । अनन्यसम्भूतैर्गुणैर्यदि भट्टा-रकस्य उन्नतत्वं न भवति कस्यान्यस्य भविष्यति । अनन्त अपरिमाण भट्टार-कस्य नाम वा । नूताः स्तुताः अनीतयः मिद्धा यैस्ते नूतानीतयः तैर्नुतं स्तुतं पूजितं आननं मुखं यस्य स्तोतुः असौ नूतानीतिनुताननः स्तुतिकर्त्ता पुरुषः । नतः प्रणतः । अनूनः अविकलः सम्पूर्णः । अनितान्तं क्लेशरहितं, क्लेशरहितं यथा भवति क्रियाविशेषणमेतत् । ते त्वां तुभ्यं वा । नेता नायकः इन्द्रादिः । अतान्ते अतान्तनिमित्तम् मोक्षनिमित्तमित्यर्थः । निनौति प्रणौति । ना पुरुषः चक्रधरादिः । किमुक्तं भवति—हे अनन्त नुन्ना-नृत उन्नत नेता निनौति नेता नायकोपि सन् । विरुद्धमेतत् । यदि नायकः कथमन्यस्य प्रणामं करोति अथ प्रणामं करोति कथं नायकः त्वां पुनः नौति नायकोपि मोक्षनिमित्तं ततस्त्वमेव नायकः ॥५५॥

---

२ नुन्नानृत + उन्नत + अनन्त इतिपदच्छेदः ।

अर्थ—एकान्तवादरूप समस्त असत्यको नष्ट करनेवाले ! सर्वश्रेष्ठ ! हे अनन्तनाथ जिनेन्द्र ! सिद्धपरमेष्ठीकी स्तुति करनेसे जिनके मुख पूज्य गिने जाते हैं और जो आपके चरणोंमें नम्र रहते हैं ऐसे इन्द्र चक्रवर्ती आदि समस्त नायक-प्रधान पुरुष-भी मोक्षप्राप्तिके लिये विना किसी क्लेशके—सहज स्वभावसे प्रेरित होकर—आपको नमस्कार करते हैं।

भावार्थ—यद्यपि यह विरुद्ध बात है कि—जो स्वयं नायक होगा वह अन्यको प्रणाम कैसे करेगा ? और अन्यको प्रणाम करेगा तो वह नायक कैसे होगा ? परन्तु आपको संसारके अन्य समस्त नायक नमस्कार करते हैं; क्योंकि आप ही उन सबमें श्रेष्ठ हैं और उस श्रेष्ठताका कारण यही है कि आपको नमस्कार करनेसे मोक्षप्राप्त होता है ॥५५॥

धर्म-जिन-स्तुतिः

(गूढद्वितीयचतुर्थान्यतरपादोऽर्द्धभ्रमः[1])

त्वमवाध दमेनर्द्ध मत धर्मप्र गोधन ।
वाधस्वाशमनागो मे धर्म शर्मतमप्रद ॥५६॥

त्वमिति—त्वं युष्मदो रूपम् । न विद्यते वाधा यस्यासावबाधः तस्य सम्बोधनं हे अवाध । दमेन उत्तमक्षमया ऋद्ध वृद्ध । मत पूजित । धर्मप्र उत्तमक्षमादिना आप्यायकपूरण । गोधन गौर्वाणी धनं यस्यासौ गोधनः तस्य सम्बोधनं हे गोधन । वाधस्व विनाशय । अशं दुःखम् । अनागः निर्दोष । मे मम । धर्म पञ्चदशतीर्थंकर । शर्म सुखम् । सर्वाणि

1 यहां द्वितीय अथवा चतुर्थ पादमेंसे कोई एक पाद अन्य पादोंके अक्षरोंमें गुप्त है। इसके सिवाय यह अर्धभ्रम भी है।

इमानि शर्म्माणि एतेषां मध्ये अतिशयेन इमानि शर्माणि शर्मतमानि तानि प्रददाति यः सः शर्मतमप्रद तस्य सम्बोधनं हे शर्मतमप्रद ॥ एतदुक्तं भवति— हे धर्म अवाध दमेनर्द्ध मत धर्मप्र गोधन अनागः शर्मतमप्रद त्वं मे अशं वाधस्व ॥५६॥

अर्थ—हे बाधा (विनाश) रहित ! हे इन्द्रियदमन अथवा क्षमासे वृद्ध ! हे पूज्य ! हे उत्तम क्षमा आदि धर्मोंके पूरक-धारक ! हे दिव्यध्वनिरूप ! धनसे सहित ! हे निर्दोष ! हे मोक्ष-रूप उत्तम सुखके देनेवाले धर्मनाथ भगवन् ! मेरे दुःखको—जन्ममरणकी बाधाको—नष्ट कीजिये ॥५६॥

(गतप्रत्यागतैकश्लोकः)

नतपाल महाराज गीत्यानुत ममाक्षर ।
रक्ष मामतनुत्यागी जराहा मलपातन ॥ ५७ ॥

नतेति—क्रमपाठे यान्यक्षराणि विपरीतपाठेपि तान्येव । नतान् प्रणतान् पालयति रक्षतीति नतपालः तस्य सम्बोधनं हे नतपाल । महान्तो राजानो यस्य स महाराजः 'टः मान्तः'[1] तस्य सम्बोधनं महाराज । अथवा नतपाला महाराजा यस्यासौ नतपालमहाराजः तस्य सम्बोधनं नतपालमहाराज । मम गीत्यानुत अस्मत्स्तवनेन पूजित । अक्षर अनश्वर । रक्ष पालय । मां अस्मदः इबन्तस्य रूपम् । अतनुत्यागी अनल्पदाता । जराहा वृद्धत्वहीनः, उपलक्षणमेतत् जातिजरामरणहीन इत्यर्थः । मलं पापं अज्ञानं पातयति नाशयतीति मलपातनः कर्तरि युट् बहुलवचनात् । तस्य सम्बोधनं हे मलपातन । एतदुक्तं भवति —हे धर्म नतपाल महाराज गीत्यानुत मम अक्षर जराहा मलपातन रक्ष मां अतनुत्यागी यतस्त्वम् ॥ ५७ ॥

अर्थ—हे नम्रमनुष्योंके रक्षक ! हे मत्कृत (मेरे द्वारा की

१ जैनेन्द्रव्याकरणस्य सूत्रमिदम्

गई) स्तुतिसे पूजित! हे अविनाशी ! हे दुष्कर्मरूपी मलको नष्ट करनेवाले! धर्मनाथ महाराज ! मेरी रक्षा कीजिये—मुझे संसारके दुःखोंसे बचाकर अविनाशी मोक्षपद प्रदान कीजिये। क्योंकि आप महान् दाता हैं—सबसे बड़े दानी हैं और जन्म-जरा आदिको नष्ट करनेवाले हैं ॥ ५७ ॥

(मुरजः)

मानसादर्शसंक्रान्तं सेवे ते रूपमद्भुतम् ।
जिनस्योदयि सत्त्वान्तं स्तुवे चारूढमच्युतम् ॥५८॥

मानसेति—मन एव मानसं चित्तमित्यर्थः मनसमेवादर्शः दर्पणः मानसादर्शः मानसादर्शे संक्रान्तं प्रतिबिम्बितं मानसादर्शसंक्रान्तम् । सेवे भजामि । ते तव । रूपं शरीरकान्तिम् । अद्भुतं आश्चर्यभूतम् । जिनस्य त्रैलोक्यनाथस्य । उदयि उदयान्वितम् । सतः शोभनस्य भावः सत्त्वं, सत्त्वस्यान्तं अवसानं परमकाष्ठा सत्त्वान्तम् । स्तुवे वन्दे । च समुच्चये । आरूढं अध्यारूढं । अच्युतं अहीनं अक्षरम् । च समुच्चयार्थः । जिनस्य रूपं सेवेऽहं स्तुवे च किंविशिष्टं रूपं मानसादर्शसंक्रान्तम् । पुनरपि किंविशिष्टं अद्भुतं उदयि सत्त्वान्तमारूढं अच्युतमिति परमभाक्तिकस्य वचनम् ॥ ५८ ॥

अर्थ—मैं आपके उस अनुपम रूप-सौन्दर्यकी उपासना और स्तुति करता हूँ जो कि सब जीवोंको आश्चर्य करनेवाला है, सदा उदयरूप रहता है, उत्तमताकी पराकाष्ठा है, आरूढ है, विनाशरहित है और मेरे मनरूपी दर्पणमें प्रतिबिम्बित होरहा है ॥ ५८ ॥

(मुरजः)

यतः कोपि गुणानुक्त्या नावाब्धीनपि पारयेत् ।
न तथापि क्षणाद्भक्त्या तवात्मानं तु पावयेत् ॥५९॥

यतः इति—यतः यस्मात्। कोपि कश्चिदपि। गुणान् जिनस्यासाधारणधर्मान्। उक्त्या वचनेन। नावा पोतेन। अब्धीन् समुद्रान्। अपि संभावने। पारयेत् प्लवताम्। न प्रतिषेधे। तथापि एवमपि। क्षणात् अक्षिसंकोचात् समयाद्वा। भक्त्या सेवया। तव ते। आत्मानं स्वम्। तु पुनः। पावयेत् पवित्रीकुर्यात्। समुदायार्थः-यतो निश्चितं चेतो मम नावाब्धीनपि पारयेत् तव गुणाननन्तान् कश्चिदपि न पारयेत् यद्यपि तथापि क्षणात् भक्त्या तवात्मानं तु पावयेत्। कुतएतत् स्तुतिमाहात्म्यात् ॥ ५६ ॥

अर्थ—हे भगवन्! यदि कोई चाहे तो नावके द्वारा समुद्रोंको पार कर सकता है। परन्तु स्तुतिरूप वचनोंसे आपके गुणोंको पार नहीं कर सकता—आपके गुण अनन्त हैं। यद्यपि यह निश्चित है तथापि भक्तपुरुष क्षणभरकी आपकी भक्तिसे अपने आपको पवित्र बना सकता है—आपकी भक्तिका माहात्म्य अचिन्त्य है।

भावार्थ--हे भगवन ! आपके अनन्त गुणोंका वर्णन करनेकी सामर्थ्य किसीमें भी नहीं है फिर भी भव्यप्राणी आपकी भक्तिरूप शुभ भावनासे अपनी आत्माको पवित्र बना लेते हैं--अशुभकर्मसे रहित कर लेते हैं और परम्परासे मोक्षभी प्राप्त कर लेते हैं ॥ ५६ ॥

(मुरजः)

रुचं बिभर्ति ना धीरं नाथातिस्पष्टवेदनः ।
वचस्ते भजनात्सारं यथायः स्पर्शवेदिनः ॥ ६० ॥

रुचमिति—रुचं दीप्तिं तेजः। बिभर्ति धरते। ना पुरुषः। धीरं गभीरं सावष्टम्भं यथा भवति क्रियाविशेषणमेतत्। हे नाथ स्वामिन् अतिस्पष्टवेदनः अतिस्पष्टं विशदं वेदनं विज्ञानं यस्यासावतिस्पष्टवेदनः। वचः वचनम्। ते तव। भजनात् सेवनात्। सारं पर-

मतत्त्वभूतम् । यथा इवार्थे । अयो लोहम् । स्पर्शवेदिन: । सुवर्णभावकारिण: स्पर्शपाषाणस्य भजनात् सेवनात् । अस्य समुदायार्थ: कथ्यते—हे नाथ ना रुचं बिभर्ति ते भजनात् वचश्च सारं धीरं यथाभवति किं विशिष्ट: सन्ना अतिस्पष्टवेदन: । कथं ? दृष्टान्तं प्रदर्शयति यथा अय: स्पर्शवेदिन: ॥ ६० ॥

अर्थ—हे नाथ ! जिस प्रकार पारस पत्थरके स्पर्शसे लोहा (सुवर्णरूप होकर) तेज धारण करता है और उसके फलस्वरूप अत्यन्त श्रेष्ठ होजाता है उसी प्रकार भव्य पुरुष भी आपकी सेवासे—आराधनासे—अत्यन्त प्रत्यक्ष केवलज्ञानसे सहित होता हुआ विशुद्ध-सुस्थिर आत्मीय तेजको धारण कर लेता है । तथा उसके वचन भी श्रेष्ठ होजाते हैं ।

भावार्थ—हे भगवन ! आपकी भक्तिसे पुरुष केवलज्ञान तथा सातिशय दिव्य ध्वनिको प्राप्त होते हैं ॥ ६० ॥

(मुरज:)

प्राप्य सर्वार्थसिद्धिं गां कल्याणेत: स्ववानत: ।
अप्यपूर्वार्थसिद्ध्येगां कल्याऽकृत भवान् युत: ॥६१॥

प्राप्येति—प्राप्य कृत्वा । सर्वार्थसिद्धिं विश्वकार्यनिष्पत्तिम् । गां पृथिवीम् । कल्याणेत: कल्याणानि स्वर्गावतरणादीनि इत: प्राप्त: कल्याणेत: । स्ववान् आत्मवान् । अत: अस्मात् । अपि । अपूर्वार्थस्य केवलज्ञानादिचतुष्टयस्य सिद्धि: प्राप्ति: अपूर्वार्थसिद्धि: तया अपूर्वार्थसिद्ध्या केवलज्ञानादिप्राप्त्या । इगां ईहां चेष्टां विहरणम् । हे कल्य समर्थ । अकृत कृतवान् । भवान् भट्टारक: । युत: युक्त: । समुदायार्थ:—भवान् कल्याणेत: सन् पुनरपि आत्मवान् सन् प्राप्य सर्वार्थसिद्धिं गां अस्मादूर्ध्वं अपूर्वार्थसिद्ध्या युतोऽपि हे कल्य त्वं तथापि चेष्टां विहरणं अकृत अत: सत्यमेतत् "परार्था हि सतां चेष्टा" ॥ ६१ ॥

अर्थ—हे कल्प-समर्थ! जहां सब अर्थों–प्रयोजनोंकी सिद्धि–पूर्ति होती है ऐसी सर्वार्थसिद्धि[1] नामक पृथिवीको पाकर गर्भ जन्म आदि कल्याणकोंसे सहित हो आप स्ववान्–आत्मवान् (पक्षमें धनवान्) हुए थे—उत्पन्न हुए थे तथा इसके बाद आपने अनन्तचतुष्टयरूप अपूर्व अर्थकी सिद्धिसे सहित होनेपर भी विहार किया था। (हे भगवन्! इन सब बातोंसे स्पष्ट है कि 'परार्था हि सतां चेष्टा'—सत्पुरुषोंकी समस्त चेष्टाएं परोपकारके लिये ही होती हैं)।

भावार्थ—जो पुरुष ऐसे स्थानको पा चुका हो जहां उसके सब मनोरथोंकी पूर्ति होती हो, अनेक कल्याण अथवा मंगलोंसे सहित हो, स्व-धन भी उसके पास पर्याप्त हो तथा इसके साथ अनोखे २ पदार्थोंकी प्राप्ति भी सदा होती रहती हो। सारांशतः- हर एक तरहसे सुखी हो—वह मनुष्य फिर भी यदि जहां तहां भ्रमणकर उपदेश आदि देनेकी चेष्टाएँ करता हो तो उसमें उसका निजी प्रयोजन कुछ भी नहीं रहता। उसकी समस्त चेष्टाएँ परोपकारके लिये ही रहती हैं। प्रकृतमें—भगवान् धर्मनाथ भी पूर्वमें तपस्या करके सर्वार्थसिद्धि विमानको प्राप्त हुए थे। वहांसे चयकर जब वे पृथिवीपर आनेको उद्यत हुए तब देवोंने गर्भ-जन्म कल्याणक किये। गर्भमें आनेके छह माह पहले से—पन्द्रह माह तक—प्रतिदिन साढ़े दश करोड़ रत्नोंकी वर्षा की। इसके बाद जब ये दीक्षित हुए तब देवोंने तपःकल्याणक किया और जब इन्हें अनन्त ज्ञान अनन्त दर्शन अनन्तसुख और अनन्त वीर्यरूप अपूर्व अर्थकी प्राप्ति हुई तब भी देवोंने ज्ञानकल्याणकका उत्सव किया—फलतः भगवान् धर्मनाथके

१ भगवान् धर्मनाथ सर्वार्थसिद्धि विमानसे चय कर गर्भमें अवतीर्ण हुए थे। —धर्मशर्माभ्युदय।

जिनके सब मनोरथ पूर्ण होचुके थे फिर भी इन्होंने जो अनेक आर्य देशोंमें विहारकर सब जीवोंको हितका उपदेश देनेकी चेष्टा की थी उसमें उनका निजी प्रयोजन कुछ भी नहीं था। केवल संसारके पथभ्रान्त पुरुषोंको सुपथ पर लाना ही उनका प्रयोजन था। इस श्लोकमें 'सर्वार्थसिद्धि' 'कल्याण' 'स्व' और 'अपूर्वार्थ' ये पद श्लिष्ट हैं—द्विअर्थक हैं, जिनका समन्वय ऊपर प्रकट किया गया है।

इस श्लोककी रचनाके पहले आचार्यके सामने अव्यक्त रूपसे एक प्रश्न उपस्थित होता है कि—जिनेन्द्रदेव जब मोहनीय कर्मका क्षय कर चुकते हैं—अपनी सब इच्छाओंका लय कर चुकते हैं—तब बिना इच्छाके उनका विहार और उपदेश कैसे होता है? इस प्रश्नका उत्तर भी आचार्य समन्तभद्रने अव्यक्त रूपसे इसी श्लोकमें दिया है अर्थात निजका कुछ प्रयोजन न रहते हुए भी जिनेन्द्रदेवका विहार आदि होता है—सिर्फ परोपकारके लिये। यद्यपि वास्तवमें भगवान्के परोपकार करनेकी भी इच्छा नहीं रहती; क्योंकि वे इच्छाओंके मूलभूत मोहनीय कर्मका क्षय कर चुकते हैं—उनकी समस्त क्रियाएं मेघोंकी तरह, सिर्फ भव्य जीवोंके सौभाग्यसे ही होती हैं। आचार्यने रत्नकरण्ड श्रावकाचारमें स्वयं कहा है कि 'अनात्मार्थं विना रागैः शास्ता शास्ति सतो हितम्। ध्वनन् शिल्पिकरस्पर्शान्मुरजः किमपेक्षते'।

(मुरजः)

भवत्येव धरा मान्या सूद्यातीति न विस्मये।
देवदेव पुरा धन्या प्रोद्यास्यति भुवि श्रिये॥ ६२॥

भवतीति—भवति भट्टारके त्वयि। एव अवधारणम्। धरा पृथिवी। मान्या पूज्या। सूद्याति उद्गच्छति प्रभवति। इति यस्मात्। न विस्मयेहं

न ममाश्चर्य्यम् । हे देवदेव देवानां देव: देवदेवः तस्य सम्बोधनं हे देवदेव परमेश्वर । पुरा पूर्वमेव । धन्या पुण्या । प्रोद्यास्यति प्रोद्गमिष्यति प्रभविष्यति । भुवि अस्मिन् लोके । श्रिये श्रीनिमित्तम् । समुदायेनार्थः कथ्यते— हे देवदेव सूद्याति भवति भगवति धरा मान्या भवतीति न विस्मयेऽहम् । यतः प्रोद्यास्यति भगवति पुरैव धन्या भुवि श्रीनिमित्तम् ॥ ६२ ॥

अर्थ—हे देवोंके देव ! यह पृथिवी आपके जन्म लेनेसे ही पूज्य मानी जाती है—इस विषयमें मुझे कुछ भी आश्चर्य नहीं है; क्योंकि आपके जन्म लेनेसे पहले ही यह पृथ्वी रत्नवर्षा आदिके द्वारा धन्य गिनी जाने लगती है तथा लक्ष्मीसे सम्पन्न हो जाती है।

अर्थ—हे अरनाथ ! आप समस्त प्राणियोंकी रक्षा करनेवाले हैं, उत्कृष्ट लक्ष्मीसहित हैं, निर्भय हैं, स्थिर हैं, अगाध-बुद्धिके के धारक हैं, जरामरणसे रहित हैं, शूरवीर हैं, श्रेष्ठ और अविनाशी ज्ञानादि-सम्पत्तिसे युक्त हैं तथा अक्षर हैं—विनाश-रहित हैं । अतः मेरी भी रक्षा कीजिये—मैं संसारपरिभ्रमणसे निवृत्त होना चाहता हूं ॥८॥

मल्लि-जिन-स्तुतिः

(अर्द्धभ्रमः)

आस यो नतजातीर्य्यां सदा मत्वा स्तुते कृती ।
यो महामतगोतेजा नत्वा मल्लिमितः स्तुत ॥९०॥

आसेति—आस अस्यतिस्म । यः यदो वान्तस्य रूपम् । नतस्य प्रणतस्य जातिः उत्पत्तिः नतजातिः नतजातेरीर्या प्राप्तिः नतजातीर्या तां नतजातीर्याम् । सदा सर्वकालम् । मत्वा ज्ञात्वा । अथवा क्तनिबन्तोयं प्रयोगः, मत्वा ज्ञातेत्यर्थः । स्तुते नुते पूजिते । कृती अनश्वरकीर्त्तिः तीर्थंकरकर्मा पुण्यवानित्यर्थः । यः यदो रूपम् । मतं आगमः, गौर्वाणी, तेजः केवलज्ञानं, द्वन्द्वः, महान्तः मतगोतेजांसि यस्यासौ महामतगो-

तेजाः। नत्वा स्तुत्वा तमिति सम्बन्धः। तं मल्लिं एकोनविंशतीर्थंकरम्। इतः प्राप्तः। अथवा इतः ऊर्ध्वं भरस्तुतेरूर्ध्वम्। स्तुत नुत। स्तु इत्यस्य धोः लोडन्तस्य रूपं बहुवचनान्तम्। एतदुक्तं भवति—यः मल्लिः नतजातीर्यां आस सदा मत्वा स्तुते सति कृती यश्च महागतगो-तेजाः तं मल्लिनाथं नत्वा इतः स्तुत ॥६०॥

अर्थ—जिन्होंने भव्य-पुरुषोंके जन्म-मरण आदि रोग नष्ट कर दिये हैं, जो हर एक समय अनन्त पदार्थोंको जानते रहते हैं, जिनकी स्तुति करनेसे साधु पुरुष तीर्थंकर जैसे सातिशय पुण्य कर्मको प्राप्त हो जाते हैं तथा जिनका आगम दिव्य-ध्वनि और ज्ञान सबसे विशाल है ऐसे मल्लितीर्थंकरको प्राप्त होकर हे भव्यजनो! नमस्कारपूर्वक उनकी स्तुति करो ॥६०॥

मुनिसुव्रत-जिन-स्तुतिः

(निरौष्ठ्ययथेष्टैकाक्षरान्तारितमुरजबन्धो
गोमूत्रिका षोडशदलपद्मश्च)

ग्लानं चैनश्च नः स्येन [1]हानहीन घनं जिन।
अनन्तानशन[2] ज्ञानस्थानस्थाऽऽनत-नन्दन ॥९१॥

ग्लानमिति—ग्लानं च ग्लानिं च। एनश्च पापं च। नः अस्माकम्। स्य विनाशय। हे इन स्वामिन्। हानहीन क्षयरहित। घनं निबिडम्। जिन परमात्मन्। अनन्त अमेय अलब्धगुणपर्यन्त। अनशन अविनाश निराहार इति वा। ज्ञानस्थानस्थ केवलज्ञानधामस्थित। आनतनन्दन प्रणतजनवर्धन। उत्तरश्लोके मुनिसुव्रतग्रहणं तिष्ठति तेन सह सम्बन्धः।

१ स्य+इन इति पदच्छेदः। स्य इति 'षोऽन्तकर्मणि' इत्यस्य-धातोर्लोट् मध्यमपुरुषैकवचनैकरूपम्। २ नशनरहित अथवा अशनरहित।

हे मुनिसुव्रत इन हानहीन जिन अनन्त अनशन ज्ञानस्थानस्थ आनत-नन्दन ग्लानं च एनश्च नः स्य ॥९१॥

अर्थः—हे मुनिसुव्रत स्वामिन्! आप क्षयरहित हैं, कर्मरूप शत्रुओंको जीतनेवाले हैं, अनन्त हैं—अपरमित गुणांसे सुशोभित हैं, नाशरहित हैं अथवा आहार-रहित हैं, केवलज्ञान-रूप स्थानमें स्थित हैं और प्रणत पुरुषोंको बढ़ानेवाले हैं—समृद्ध करनेवाले हैं। हे प्रभो! हमारी भी यह ग्लानि और (रागादिरूप) पाप परिणति दूर कीजिये।

(अर्द्धभ्रमः)

पावनाजितगोतेजो वर नानाव्रताक्षते[1]।
नानाश्चर्य सुवीतागो जिनार्य मुनिसुव्रत[2] ॥९२॥

पावनेति—पावन पवित्र। गौश्च तेजश्च गोतेजसी, न जिते गोते-जसी वाणीज्ञाने यस्यासावजितगोतेजाः तस्य सम्बोधनं हे अजितगोतेजः। वर श्रेष्ठ। नानाव्रत नानानुष्ठान। छद्मस्थावस्थायामाचरणकथनमेतत्। अक्षते अक्षय। नानाभूतानि आश्चर्याणि ऋद्धयः प्रातिहार्याणि वा यस्यासौ नानाश्चर्यः, तस्य संबोधनं हे नानाश्चर्य। सुष्ठु वीतं विनिष्ट आगः पापं अपराधो यस्यासौ सुवीतागाः तस्य संबोधनं हे सुवीतागः जिन जिनेन्द्र। आर्य स्वामिन्। मुनिसुव्रत विंशतितमतीर्थकर। अति-क्रान्तेन क्रियापदेन स्य इत्यनेन सह सम्बन्धः। एतदुक्तं भवति—हे पावन अजितगोतेजः वर नानाव्रत अक्षते नानाश्चर्य सुवीतागः जिन आर्य मुनिसुव्रत नः अस्माकं ग्लानं एनश्च स्य विनाशय ॥९२॥

अर्थ—हे भगवन्! आप परम पवित्र हैं—राग आदि दोषोंसे रहित हैं, आपकी दिव्यध्वनि और आपका केवलज्ञान-

---

१ अक्षते! अक्षति शब्दस्य सम्बोधने रूपम्।

२ नो ग्लानिमेनश्च स्य विनाशय इति पूर्वश्लोकेन साकमन्वयः।

रूपी तेज अजय है—इन्हें कोई नहीं जीत सकता। आप अत्यन्त श्रेष्ठ हैं, आपने छद्मस्थ अवस्थामें—केवलज्ञान प्राप्त होनेके पहले—अनेक व्रतोंको धारण किया था, आप क्षय-रहित हैं, अनेक आश्चर्य-सहित हैं—ऋद्धियों और प्रातिहार्योंसे युक्त हैं—आपके समस्त पाप नष्ट हो गये हैं, आप जिनेन्द्र हैं तथा सबके स्वामी हैं। हे मुनिसुव्रत भगवन्! हमारी भी सांसारिक ग्लानि और पापपरिणतिको नष्ट कर दीजिये।

यहां क्रियादिका सम्बन्ध पूर्व श्लोकके साथ है ॥९२॥

———

नमि-जिन-स्तुतिः

(गतप्रत्यागतपादयमकाक्षरद्वयविरचितसन्निवेशविशेष-समुद्गतानुलोमप्रतिलोमश्लोकयुगलश्लोकः)

नमेमान नमामेनमानमाननमानमा[1]—
मनामोनु नुमोनामनमनोमम नो मन ॥९३॥

नमेति—गतप्रत्यागतपादयमको नकारमकाराक्षरद्वयविरचितश्लोकद्वयं श्लोकयुगलमित्यर्थः। अन्यद्विशेषणं मुखशोभनार्थम्।

हे नमे एकविंशतितीर्थंकर। अमान अपरिमेय। नमाम प्रणमाम स्वामित्यध्याहार्यमर्थसामर्थ्याद्वा लभ्यम्। इनं स्वामिनम्। आनानां प्राणिनां माननं प्रबोधकं मानं विज्ञानं यस्यासौ आनमाननमानः तं आनमाननमानं भव्यप्राणिप्रबोधकविज्ञानमित्यर्थः। आन इति अन श्वस प्राणने इत्यस्य धोः घञन्तस्य रूपम्। माननमिति मन ज्ञाने इत्यस्य धोः णिना युडन्तस्य रूपम्। आमनामः आ समन्तात् चिन्तयामः। मन अभ्यासे इत्यस्य धोः लडन्तस्य रूपम्। अनु पश्चात् नुमः वन्दामहे।

---

[1] अमनामः इति पदच्छेदः। अत्र द्वितीयपादस्य तृतीयपादेन सह सन्धिसम्बन्धः यश्च प्रायोऽन्यात्राऽप्रसिद्धः।

अनामनं अ-नमनप्रयोजकं मनः चित्तं यस्यासौ अनामनमना: तस्य सम्बोधनं हे अनामनमनः बलात्कारेण न परान्नामयतीत्यर्थः, अनेन वीतरागत्वं ख्यापितं भवति। अथवा नामनानि नमनशीलानि मनांसि चित्तानि यस्माद् भवन्ति असौ नामनमनाः तस्य सम्बोधनं हे नामनमनः। अथवा नामनं स्तुतिनिमित्तं मनः चित्तं यस्मादसौ नामनमनाः तस्य सम्बोधनं हे नामनमनः। अमम हे अमोह। नः अस्मान्। मन अभ्यासय चिन्तय इत्यर्थः 'मन अभ्यासे इत्यस्य धोः लोडन्तस्य रूपम्'। एतदुक्तं भवति—हे नमे अमान अमम अनामनमनः त्वां इनं मान-माननमानं आमनामः नमाम अनु नुमः यस्मात्तस्मात् नः अस्मान् मन चिन्तय ॥९३॥

अर्थ—हे नमिनाथ ! आप अपरिमेय हैं—हमारे जैसे अल्पज्ञानियोंके द्वारा आपका वास्तविक रूप नहीं समझाजाता। आप सबके स्वामी हैं। आपका ज्ञान सब जीवोंको प्रबोध करने-वाला है। आप किसीसे उसकी इच्छाके विरुद्ध नमस्कार नहीं कराते। आप वीतराग हैं और मोह-रहित हैं अतः आपको सदा काल नमस्कार करता हूँ—हमेशा आपका ध्यान करता हुआ आपकी स्तुति करता हूँ। प्रभो ! मेरा—मुझ शर-णागतका—भी सदा ध्यान रखिये—मैं आपके समान पूर्ण ज्ञानी तथा मोह-रहित होना चाहता हूँ॥ ९३ ॥

न मे माननमामेन मानमाननमानमा—
मनामो नु नु मोनामनमनोम मनोमन ॥ ९४ ॥

नमेमेति—न प्रतिषेधवचनम्। मे मम। माननं पूजनं प्रभुत्वं स्वातन्त्र्यमित्यर्थः। आमेन रोगेण संसारदुःखेन कर्मणा इत्यर्थः। किंवि-शिष्टेनामेन मानमा मानं ज्ञानं मिनाति हिंसयतीति मानमाः तेन मानमा। अननं प्राणनं जीवनं मिनाति हिंसयतीति माननमाः तेन अन-नमा। आ समन्तात् नमन्तीत्यानमाः स्तुतेः कर्त्तारः। आनमानां अमनं

रोगः व्याधिः आनमामवं तत् अमति रुजति भनक्तीति 'कर्मण्यण्' आनमामनामः त्वमिति सम्बन्धः। नु वितर्के। अन्योपि नु वितर्के। मा लक्ष्मीः तया ऊनाः रहिताः मोनाः मोनानां आमः रोगः मोनामः तं नामयतीति मोनामनमनः त्वमिति सम्बन्धः। अम गच्छ। मे इत्य-ध्याहार्यः। मनः चित्तम्। अमन कान्त कमनीय। एतदुक्तं भवति—आनमामनामो नु त्वं यस्मात् मोनामनमनो नु यस्मात् त्वं तस्मात् हे नमे अमन मे मनः अम गच्छ यस्मात् मे मम माननं नास्ति आमेन कि विशिष्टेन मानमा पुनरपि अननमा॥ ६४॥

अर्थ—प्रभो! जो आपको भक्ति-पूर्वक नमस्कार करता है आप उसके सब रोग नष्ट कर देते हैं तथा जो ज्ञानादिलक्ष्मीसे रहित हैं – वस्तुतः निर्धन हैं—उनके भी समस्त सांसारिक रोगोंको नष्टकर देते हैं। इसके सिवाय आप अत्यन्त सुन्दर हैं। हे नमिजिन! ज्ञान गुणको घातनेवाले तथा जीवके शुद्ध स्वरूपको नष्ट करनेवाले इन कर्मरूपी रोगोंने मेरा समस्त प्रभुत्व अथवा स्वातन्त्र्य हर लिया है अतः आप मेरे हृदय-मन्दिरमें प्रवेश कीजिये, जिससे कि मेरी स्वतन्त्रता मुझे प्राप्त हो सके।

भावार्थ–यहां आचार्य समन्तभद्रने भगवान् नमिनाथकी स्तुति करते हुए कहा है कि आप भक्तपुरुषोंके समस्त रोग–दुःख नष्ट कर देते है तथा दरिद्र मनुष्योंके भी आप अत्यन्त हितैषी हैं—उनके भी दारिद्र्यजनित समस्त रोग-दुःख नष्ट करदेते हैं। हे प्रभो! मेरे पीछे भी यह दुःखदायी संसाररूपी रोग पड़ा हुआ है इसने मेरी सर्व स्वतन्त्रताको हर लिया है। मेरी केवलज्ञानादि सम्पत्ति भी इसके द्वारा हरली गई है अतः मैं एक तरहसे दरिद्र तथा असमर्थ हो रहा हूं अतः आप मेरे हृदयमें प्रवेशकर मेरे सब रोगोंको दूर कर दीजिये। जिसमें रोग दूर करनेकी सामर्थ्य होती है उसीसे तो प्रार्थना की जाती है। श्लोकका सार आशय यह है कि आपका ध्यान करनेसे जीवोंके समस्त सांसा-

रिक रोग दूर हो जाते हैं, फलतः वे जीव सर्वथा नीरोग हो कर मुक्त हो जाते हैं और सदाके लिये अपने स्वाधीन सुखके उपभोक्ता बन जाते हैं ॥९४॥

(अनुलोमप्रतिलोमसकलश्लोकगतप्रत्यागतार्द्धः)

नर्दयाभर्त्तवागोद्य द्य गोवार्त्तभयार्दन ।
तमिता नयजेतानुनुताजेय नतामित ॥९५॥

नर्दयेति—गतप्रत्यागतार्धं इत्यर्थः । हे नः पूज्यपुरुष । दया एव आभा रूपं यस्यासौ दयाभः तस्य सम्बोधनं हे दयाभ दयारूप । ऋता सत्या वाक् वाणी ऋतवाक् सत्यवचनम्, आ समन्तात् उद्यत इत्योद्यम्, ऋतवाचा सत्यवाण्या ओद्यं आकारं यस्यासौ ऋतवागोद्यः तस्य सम्बोधनं हे ऋतवागोद्य । द्य खण्डय । गौर्वाणी, वार्त्तैव वार्त्तं, गोः वार्त्तं गोवार्त्तं वचनवार्ता । भयानां अर्दनः विनाशकः भयार्दनः । गोवार्त्तेन भयार्दनः गोवार्त्तभयार्दनः अथवा गोवार्त्तेन भयार्दनं यस्मादसौ गोवार्त्तभयार्दनः तस्य सम्बोधनं हे गोवार्त्तभयार्दन वचनवार्त्तया भयविनाशक तमिताः खेदरूपाणि दुःखानीत्यर्थः । नयैर्जयनशीलः नयजेता त्वमिति सम्बन्धः । हे अनुनुत सुपूजित इत्यर्थः । अजेय अपराजेय अजय्य इत्यर्थः । नताः प्रणताः अमिता अपरिमिताः इन्द्रादयो यस्यासौ नतामितः तस्य सम्बोधनं हे नतामित । एतदुक्तं भवति—हे नः, दयाभ, ऋतवागोद्य, गोवार्त्तभयार्दन अनुनुत अजेय नतामित नयजेता त्वं यतस्ततस्त्वं तमिताः दुःखानि द्य खण्डय । अस्माकं अनुक्तमपि लभ्यते ॥९५॥

अर्थ—हे नमिनाथ ! आप पूज्य हैं, दयास्वरूप हैं अथवा दयासे शोभायमान हैं, अनेकान्तरूप सत्यवाणीके द्वारा ही आपका स्वरूप जाना जाता है । आपके उपदेशकी चर्चा मात्रसे समस्त भय नष्ट हो जाते हैं । आपने अनेकान्तके--परस्पर सापेक्षनय वादके--द्वारा समस्त जगत्को जीत लिया है । आपकी सब स्तुति

करते हैं। विश्वको कोई भी शक्ति आपको नहीं जीत सकती—आप अजेय हैं, इन्द्र नरेन्द्र आदि असंख्यात जीव आपको नमस्कार करते हैं। हे प्रभो! मेरे जन्ममरणके दुःखोंको दूर कीजिये ॥९५॥

(अनुलोमप्रतिलोम-गतप्रत्यागतश्लोकः)

हतभीः स्वय मेध्याशु[1] शं ते दातः श्रिया तनु।
नुतया श्रित दान्तेश शुद्ध्यामेय स्वभीत ह[2] ॥९६॥

हतेति—गतप्रत्यागतैकश्लोक इत्यर्थः। हतभीः विनष्टभयः त्वं। स्वयः शोभनः अयो यस्यासौ स्वयः तस्य सम्बोधनं स्वय। मेध्य पूत। आशु शीघ्रम्। शं सुखम्। ते तव। दातः दानशीलः। श्रिया लक्ष्म्या। तनु कुरु देहि वितर विस्तारय इति पर्यायाः। नुतया पूजितया। श्रित सेव्ये। दान्तेश मुनीश। शुद्ध्या केवलज्ञानेन। अमेय अपरिमेय। सुष्ठु अभीतः स्वभीतः तस्य सम्बोधनं स्वभीत अनन्तवीर्य ह स्फुटार्थकः। समुदायार्थः—हे नमे यतः त्वं हतभीः स्वय मेध्य दातः श्रिया नुतया श्रित दान्तेश शुद्ध्यामेय स्वभीत ते तव यत् शं सुखं तत् तनु कुरु देहि ह स्फुटम् ॥९६॥

अर्थ—हे नमिनाथ! आप भयरहित हो, महापुण्यवान्हो—तीर्थंकरनामकर्म-जैसी पुण्यप्रकृतिके उदयसे युक्त हो, पवित्रहो, दानशीलहो, अत्यन्तउत्कृष्ट अनन्तचतुष्टयरूप लक्ष्मीसे सेवित हो, मुनियोंके स्वामी हो, केवलज्ञानरूपी शुद्धिसे अमेय हो—आपका केवलज्ञान मानरहित है—अनन्त है। और आप अनन्तवीर्यसे सहित हैं यह बात अत्यन्त स्पष्ट है। हे प्रभो! आपमें जो अनन्त आत्मीय सुख है वह मुझे भी शीघ्र दीजिये ॥९६॥

---

1 मेध्य+आशु इति सन्धिः। 2 ह इत्यव्ययं स्फुटार्थकम्।

नेमि-जिन-स्तुतिः

(द्व्यक्षरश्लोकः)

मानोनानामनूनानां मुनीनां मानिनामिनम् ।
मनूनामनुनौमीमं नेमिनामानमानमन् ॥९७॥

मानोनेति—मकारनकाराक्षरैर्विरचितो यतः । मानोनानां गर्व-हानानां । अनूनानां अहीनानां चारित्रसम्पूर्णानामित्यर्थः । मुनीनां साधूनां । मानिनां पूजितानां । इनं स्वामिनं । मनूनां ज्ञानिनां । मनु शब्दोऽयं मन ज्ञाने इत्यस्य धोः औणादिकत्यान्तस्य रूपम् । अनुनौमि सुष्ठु स्तौमि । इमं प्रत्यक्षवचनं । नेमिनामानं अरिष्टनेमिनाथम् । आन-मन् प्रणमन् । अहमिति संबन्धः । समुदायार्थः—इमं नेमिनामानं किं विशिष्टं इनं स्वामिनं केषां नुनानां किं विशिष्टानां मानोनानाम् अनू-नानां मानिनां मनूनां आनमन्नहं अनुनौमि ॥९७॥

अर्थ—मैं (समन्तभद्र) अहंकार-रहित, उत्कृष्ट एवं सम्पूर्ण चारित्रके धारक, पूज्य और ज्ञानवान् मुनियोंके स्वामी भगवान् नेमिनाथको मन-वचन-कायसे पुनः पुनः नमस्कार करता हुआ उनकी निरन्तर स्तुति करता हूँ ॥९७॥

(अनुलोमप्रतिलोमैकश्लोकः)

तनुतात्सद्यशोमेय शमेवार्य्यवरो गुरु ।
रुगुरो वर्य्य वामेश यमेशोद्यत्सतानुत ॥९८॥

तनुतादिति--गतप्रत्यागत इत्यर्थः । तनुतात् कुरुतात् सद्यशः शोभन-कीर्ते । अमेय अपरिमेय । शमेव सुखमेव । आर्याणां प्रधानानां वरः श्रेष्ठः आर्यवरः त्वमिति सम्बन्धः । गुरु महत् सुखेन सम्बन्धः । रुचा दीप्त्या उरुः महान् रुगुरुः तस्य सम्बोधनं हे रुगुरो दीप्त्या महत् । वर्य प्रधान । वामेश शोभनेश । यमेश व्रतस्वामिन् । उद्यत्सतानुत उद्योगवता पण्डितजनेन नुत स्तुत । एवं सम्बन्धः कर्तव्यः—हे नेमिनाथ सद्यशः

क्षमेय स्तुरो वर्यं वामेश यमेश उद्यस्सता नुत आर्यवरस्त्वं गुरु शमेव तनुतात् ॥६८॥

अर्थ—हे भगवन् ! आपका यश अत्यन्त निर्मल है, आप अल्पज्ञानियोंके ज्ञानके अगोचर हैं—अल्पज्ञानी आपके वास्तविक रूपको नहीं समझ पाते, आप आर्य पुरुषोंमें अत्यन्त श्रेष्ठ हैं, इन्द्र अहमिन्द्र आदि प्रधानजनोंके भी स्वामी हैं, व्रतियों—मुनियोंके नाथ हैं और बड़े-बड़े उत्कृष्ट पंडितजन भी आपकी स्तुति करते हैं। हे प्रभो ! मुझे वह सर्वोत्कृष्ट मोक्षरूप सुख ही प्रदान कीजिये जिसके आप नायक हैं—अन्य वैषयिक सुखकी मुझे इच्छा नहीं है ॥६८॥

पार्श्व-जिन-स्तुतिः

(मुरजबन्धः)

जयतस्तव पार्श्वस्य श्रीमद्भर्तुः पदद्वयम् ।
क्षयं दुस्तरपापस्य क्षमं कर्तुं ददज्जयम् ॥९९॥

जयेति—जयतः जयं कुर्वतः । तव ते । पार्श्वस्य त्रयोविंशतितीर्थकरस्य । श्रीमत् लक्ष्मीमत् । भर्तुः भट्टारकस्य स्वामिनः । पदद्वयं पदयुगलम् । क्षयं विनाशम् । दुस्तरपापस्य अतिगहनपापस्य । क्षमं समर्थम् । कर्तुं विधातुम् । ददज्जयं विधद्द्विजयम् । समुदायार्थः—जयतस्तव पार्श्वस्य भर्तुः पदद्वयं श्रीमत् ददत् जयं दुस्तरपापस्य क्षयं कर्तुं क्षमम् उत्तर श्लोकेन सम्बन्धः ॥९९॥

अर्थ—हे प्रभो पार्श्वनाथ ! आप कर्मरूप शत्रुओंको जीतनेवाले हैं, सबके स्वामी हैं। आपके चरणकमल अत्यन्त शोभायमान हैं, सर्वत्र विजयके देनेवाले हैं और कठिनसे कठिन पापोंका

क्षय करनेके लिये समर्थ हैं। हे भगवन्! आपके चरणकमल हमारे अज्ञानरूप अन्धकारको नष्ट करें[1] ॥९९॥

(गूढतृतीयचतुर्थानन्तराक्षरद्वयविरचितयमकानन्तरपादमुरजबन्धः)

तमोत्तु ममतातीत ममोत्तममतामृत
ततामितमते तातमतातीतमृतेमित ॥ १०० ॥

तमोत्तमेति—तव पार्श्वस्य इत्येतद्द्वयमनुवर्तते। तमोत्तु तमो भक्षयतु अज्ञानं निराकरोत्वित्यर्थः। ममतातीत ममत्वातिक्रान्त। मम आत्मनः अस्मदः नान्तस्य रूपं। उत्तमं प्रधानं मतामृतं आगमामृतं यस्यासौ उत्तममतामृतः, तस्य संबोधनं हे उत्तममतामृत प्रधानागमामृत। तता विशाला अमिता अपरिमिता मतिर्ज्ञानं यस्यासौ ततामितमतिः तस्य सम्बोधनं हे ततामितमते विशालापरिमितज्ञान। तात इति मतः तातमतः श्रेण्याधिकृतैरिति सविधिः, तात इति औणादिकः प्रयोगः तस्य सम्बोधनं हे तातमत। अतीता अतिक्रान्ता मृतिः मरणं यस्यासौ अतीतमृतिः तस्य सम्बोधनं हे अतीतमृते अतिक्रान्तमरण। अमित अपरिमित। किमुक्तं भवति—हे पार्श्वभट्टारक ममतातीत उत्तममतामृत ततामितमते तातमत अतीतमृते अमित तव पदद्वयं मम तमोत्तु भक्षयतु ॥ १०० ॥

अर्थ—हे पार्श्वनाथ! आप ममता-रहित हैं—पर पदार्थोंमें 'यह मेरा है और मैं इनका हूँ' ऐसा भाव नहीं रखते। आपका आगमरूपी अमृत अत्यन्त उत्कृष्ट है, आपका केवलज्ञान अत्यन्त विस्तृत और अपरिमित है—पाररहित है, आप सबके बन्धु हैं, नाश-रहित हैं, और अपरिमित हैं। आपके दोनों चरणकमल[2] मेरे अज्ञान अन्धकारको नष्ट करें ॥ १८० ॥

१ तमोऽस्तु इत्युत्तरश्लोकेन सम्बन्धः।

२ पूर्वश्लोकेन सम्बन्धः।

(मुरजबन्धः)

स्वचित्तपटयालिख्य जिनं चारु भजत्ययम् ।
शुचिरूपतया मुख्यमिनं पुरुनिजश्रियम् ॥ १०१ ॥

स्वचित्तेति—स्वचित्तपटे आत्मीयचेतःपट्टके । आलिख्य लिखित्वा । जिनं पार्श्वनाथम् । चारु शोभनं यथा भवति तथा क्रियाविशेषणमेतत् । भजति सेवते । अयं जनः आत्मानं कथयति । शुचिरूपतया शुद्धस्वरूपत्वेन । मुख्यं प्रधानं । इनं स्वामिनं । पुरु महती निजा आत्मीया श्रीर्लक्ष्मीर्यस्यासौ पुरुनिजश्रीः अतस्तं पुरुनिजश्रियं महदात्मीयलक्ष्मीम् । समुदायार्थः—जिनं पार्श्वनाथं इनं पुरुनिजश्रियं मुख्यं आलिख्य स्वचित्तपटे अयं जनो भजति । किं निमित्तं ? शुचिरूपतया शुद्धस्वरूपमितिकृत्वा ॥ १०१ ॥

अर्थ—हे भगवन् ! आप कर्मरूपी रिपुओंको जीतनेवाले हैं, सबमें मुख्य हैं, सबके स्वामी हैं और आपकी अनन्तचतुष्टयरूप लक्ष्मी सबसे बढ़कर है। हे प्रभो ! यह समन्तभद्र आपको अत्यन्त शुद्ध स्वरूप मानकर सुन्दर रीतिसे अपने चित्तपटलपर लिखकर—मनमें ध्यान करता हुआ—आपकी आराधना करता है ॥ १०१ ॥

वर्धमान-जिन-स्तुतिः

(मुरजबन्धः)

धीमत्सुवन्द्यमान्याय कामोद्वामितवित्तृषे ।
श्रीमते वर्धमानाय नमो नमितविद्विषे ॥ १०२ ॥

धीमदिति—धीमान् बुद्धिमान् । सुवन्द्यः सुस्तुतः । मान्यः पूज्यः । धीमांश्चासौ सुवन्द्यश्च धीमत्सुवन्द्यः, धीमत्सुवन्द्यश्चासौ मान्यश्च धीमत्सुवन्द्यमान्यः तस्मै धीमत्सुवन्द्यमान्याय । अथवा धीमत्सु बुद्धि-

मस्तु मध्ये सुवन्द्यमान्याय। विदः बोधस्य तृट् तृष्णा वित्तृट्, कामं अत्यर्थं, उद्भामिता उद्गारिता निराकृता वित्तृट् ज्ञानतृष्णा येनासौ कामोद्भामितवित्तृट् तस्मै कामोद्भामितवित्तृषे। श्रीमते लक्ष्मीमते। वर्धमानाय महावीराय चतुर्विंशतितीर्थंकराय। नमः। अयं शब्दो भिन्नसंज्ञकः पूजा-वचनः। नमिताः विद्विषो यस्यासौ नमितविद्विट् तस्मै नमितविद्विषे अधःकृतवैरिणे। समुदायार्थः—नमोस्तु ते वर्धमानाय किं विशिष्टाय धीमत्सुवन्द्यमान्याय कामोद्भामितवित्तृषे श्रीमते नमितविद्विषे ॥१०२॥

अर्थ—हे वर्धमान स्वामिन्! आप अत्यन्त बुद्धिमानों—चार ज्ञानके धारी गणधरादिकोंके द्वारा वन्दनीय और पूज्य हैं। आपने ज्ञानकी तृष्णाको बिल्कुल नष्ट कर दिया है—आपको सर्वोत्कृष्ट केवलज्ञान प्राप्त होगया है जिससे आपकी ज्ञान-विषयक समस्त तृष्णाएं नष्ट हो चुकी हैं, आप अन्तरङ्ग-बहिरङ्ग लक्ष्मीसे युक्त हैं और आपके शत्रु भी आपको नमस्कार करते हैं—आपकी अलौकिक शान्ति तथा लोकोत्तर प्रभावको देखकर आपके विरोधी वैरी भी आपको नमस्कार करने लग जाते हैं। अतः हे प्रभो! आपको मेरा नमस्कार हो ॥१०२॥

(मुरजबन्धः)

वामदेव क्षमाजेय धामोद्यमितविज्जुषे।
श्रीमते वर्धमानाय नमोन मितविद्विषे ॥ १०३ ॥

वामदेवेति—नमोवर्धमानायेति सम्बन्धः। वामानां प्रधानानां देवः तस्य सम्बोधनं हे वामदेव। क्षमा अजेया यस्यासौ क्षमाजेयः तस्य सम्बोधनं हे क्षमाजेय। धाम्ना तेजसा उद्यमिता कृतोत्कृष्टा वित् विज्ञानं धामोद्यमितवित् तां जुष्टे सेवते इति धामोद्यमितविज्जुट् तस्मै धामोद्यमितविज्जुषे। अथवा अजेयं धाम तेजो यस्याः सा अजेयधामा, उद्यमिता उद्गता वित् ज्ञानं उद्यमितवित्, अजेयधामा चासौ उद्यमितविच्च

अजेयधामोद्यमितवित् तां जुषे इति अजेयधामोद्यमितविज्जुट् तस्मै अजेयधामोद्यमितविज्जुषे । श्रीमते इत्यादि पूर्व एवार्थः । अथवा श्रिया उपलक्षिता मतिर्यस्यासौ श्रीमतिः तस्य सम्बोधनं हे श्रीमते । वर्धमानः वृद्धिं गच्छन् अयः मार्गो यस्यासौ वर्धमानायः तस्य सम्बोधनं हे वर्धमानाय । मा लक्ष्मीः तया ऊनः मोनः न मोनः नमोनः तस्य सम्बोधनं हे नमोन । मिता परिमिता वित् ज्ञानं मितवित् तां विष्णाति निराकरोति इति मितविद्विट् तस्मै मितविद्विषे । एवं सम्बन्धः कर्तव्यः—हे वर्धमान श्रीमते वर्धमानाय नमोन मितविद्विषे ते नमः । पुनरपि किं विशिष्टाय वामदेव क्षमाजेय धामोद्यमितविज्जुषे ॥ १०३ ॥

अर्थ--हे भगवन् ! आप,इन्द्र चक्रवर्ती आदि प्रधान पुरुषोंके भी देव-इन्द्र हैं, आपका क्षमागुण सर्वथा अजेय है, आप तेजसे प्रकाशमान केवलज्ञानको प्राप्त हुए हैं, आपकी मति-ज्ञान-सम्पत्ति समवशरणादि लक्ष्मीसे उपलक्षित है, आपके द्वारा प्रचलित मोक्षमार्ग हमेशा बढ़ता रहता है अथवा आपका पुण्य उत्तरोत्तर बढ़ रहा है, आप लक्ष्मीसे परिपूर्ण हैं तथा मतिश्रुत आदि क्षायोपशमिक-अल्पज्ञानोंको दूर करनेवाले हैं अतः आपके लिये नमस्कार हो ॥ १०३ ॥

(मुरजबन्धः)

समस्तवस्तुमानाय तमोघ्नेमितवित्विषे ।
श्रीमतेवर्धमानाय नमोन मितविद्विषे ॥ १०४ ॥

समस्तेति—समस्ते विश्वस्मिन् वस्तुनि पदार्थे मानं ज्ञानं यस्यासौ समस्तवस्तुमानः तस्मै समस्तवस्तुमानाय । तमोघ्ने अज्ञानविनाशकाय । विशिष्टा त्विट् इति वित्विट् अमिता वित्विट् यस्यासौ अमितवित्विट् तस्मै अमितवित्विषे,श्रीमते इत्येवमादिषु पूर्व एवार्थः । अथवा श्रियं मिमीत इति श्रीमः तस्य सम्बोधनं हे श्रीम । ते तुभ्यं । अथवा श्रियं मन्यत इति श्रीमत् तस्मै श्रीमते । ऋद्धं वृद्धं अवेन कान्त्या ऋद्धं अवर्द्धं,

अवर्द्धमानं ज्ञानं यस्यासौ अवर्धमानः अथवा अवर्धं अच्छिन्नं मानं यस्यासौ अवर्धमानः तस्मै अवर्धमानाय । मा पृथ्वी तया ऊनः मोनः न मोनः नमोनः अयं नञ् प्रतिरूपो निपातसंज्ञको नकारः अतो नञोन्यत्रानादेशो न भवति तस्य सम्बोधनं हे नमोन । मितेन ज्ञानेन विनष्टा द्विट् अप्रीतिर्यस्यासौ मितविद्विट् तस्मै मितविद्विषे । किमुक्तं भवति—हे श्रीमते नमोन तुभ्यं नमः किं विशिष्टाय समस्तवस्तुमानाय तमोघ्ने अमितत्विषे अवर्धमानाय मितविद्विषे ॥ १०४ ॥

अर्थ—हे भगवन् ! आपका ज्ञान संसारके समस्त पदार्थोंको जानता है, आप अज्ञान अथवा मोहको नष्ट करनेवाले हैं, आपके शरीरको विशिष्ट कान्ति अपरिमित है—आप सर्वाङ्ग सुन्दर हैं—अथवा आपका त्विट्—केवलज्ञान—अपरिमित है, आप लक्ष्मीसे सम्पन्न हैं, आपका केवलज्ञान लोकोत्तर कान्तिसे वृद्धिको प्राप्त है अथवा आपका केवलज्ञान विच्छेदसे रहित है—अखण्ड है, आप लोकत्रयरूप पृथ्वीसे रहित नहीं हैं—आप तीनों लोकोंके स्वामी हैं और आपने अपने ज्ञानसे समस्त अन्तरङ्ग-बहिरङ्ग शत्रुओंको नष्ट कर दिया है । अतः हे प्रभो ! आपके लिये नमस्कार हो ॥ १०४ ॥

(मुरजबन्धः)

प्रज्ञायां तन्वृतं गत्वा स्वालोकं गोर्विदास्यते ।
यज्ज्ञानान्तर्गतं भूत्वा त्रैलोक्यं गोष्पदायते १०५

प्रज्ञेति—प्रज्ञायां बुद्ध्यां । तनु स्तोकं । ऋतं सत्यं । गत्वा ज्ञात्वा । स्वालोकं आत्मावबोधनं । गोर्विदा पृथिव्या ज्ञात्रा इति अस्यते । यस्य ज्ञानान्तर्गतं बोधाभ्यन्तरम् । भूत्वा प्रभूय । त्रैलोक्यं जगत्त्रयम् । गोष्पदायते गोष्पदमिवात्मानमाचरति । समुदायार्थः—प्रज्ञायां तनु ऋतं गत्वा स्वालोकं गोर्विदा अस्यते पुरुषेण तव पुनः ज्ञानान्तर्गतं भूत्वा

त्रैलोक्यं गोष्पदायते तथापि न हर्षो नापि विषादो यतः त्वमेव सर्वज्ञो वीतरागश्च अतः तुभ्यं नमोस्तु इति सम्बन्धः ॥१०५॥

अर्थ—हे भगवन् ! ये संसारके प्राणी अपनी तुच्छ बुद्धिके अनुसार थोड़ेसे पदार्थोंको सत्यरूप जान कर अपने आपको पृथिवीका ज्ञाता मान बैठते हैं परन्तु चौदह राजु प्रमाण तीन लोक आपके ज्ञानके अन्तर्गत-प्रतिबिम्बित-होकर गोष्पद के—गायके खुरके—समान मालूम होते हैं ।

भावार्थ—यहां संसारी प्राणी तथा भगवान् महावीरके बीच व्यतिरेक बतलाया गया है—संसारी प्राणी अपने क्षयोपशमके अनुसार थोड़ेसे पदार्थोंको जानकर अपने आपको बहुज्ञानी समझ कर हर्ष या मद करने लग जाते हैं परन्तु भगवान् महावीरका ज्ञान इतना विशाल है कि उसमें तीनों लोक गायके खुरके समान अत्यन्त तुच्छ मालूम होते हैं । उनका केवलज्ञान यदि समुद्र है तो उसके सामने ये तीनों लोक गोष्पद हैं—अत्यन्त अल्प हैं । इतने महान् ज्ञानी होनेपर भी उन्हें कुछ भी हर्ष या विषाद नहीं होता अतः वे सर्वथा पूज्य है ॥१०५॥

(श्लोकयमकः)

को विदो भवतोपीड्यः सुराननुतान्तरम् ।
शं सते साध्वसंसारं स्वमुद्यच्छन्नपीडितम् ॥१०६॥

कोवीति—कः किमोरूपम् । विदो ज्ञानानि । भवतः त्वत्तः । अपि । ईट् स्वामी । यः यदोरूपम् । सुरान् अमरान् । अपि शब्दोऽत्र सम्बन्धनीयः सुरानपीति । अतनुत विस्तारयतिस्म । अन्तः चित्ते भवं आन्तरं आत्मोत्थम् । शं सुखम्, सते शोभनाय । साधु शोभनं । असंसारं सांसारिकं न भवति । सुष्ठु अमुत् स्वमुत् विनष्टराग इत्यर्थः । यच्छन् ददत् । अपीडितं अबाधितम् । समुदायार्थः—हे वर्धमान भवतो नान्यः ईट् यः सुरानपि विदः अतनुत सुखं आन्तरं साधु असंसारं

अपोहितं यच्छन् सते शोभनपुरुषाय स कोऽन्यो भवतः स्वमुत् ईट् यावता हि न कश्चित् तस्मात् भवानेव सर्वज्ञः ॥१०६॥

अर्थ—हे वर्धमान स्वामिन् ! आपसे अतिरिक्त ऐसा कौन स्वामी है जो कि देवोंको भी ज्ञान सम्पादन करावे और भव्य पुरुषोंके लिये आत्मोत्थ, उत्कृष्ट तथा बाधारहित मोक्ष-सम्बन्धी सुखको देता हुआ भी स्वयं रागसे रहित हो ? हे नाथ ! ऐसे आप ही हो अतः आपको नमस्कार हो ।

भावार्थ—संसारके लोगोंने जिन्हें ईश्वर माना है वे स्वयं इतने अल्पज्ञानी थे कि उन्हें आगे-पीछेकी बातका जान लेना मुश्किल था। ऐसी परिस्थितिमें वे जन्मसे ही मति, श्रुत, तथा अवधि ज्ञानके धारण करनेवाले देवोंको क्या ज्ञान देते ? परन्तु श्रीवर्धमानस्वामी इतने अधिक ज्ञानी थे कि वे तीनों लोक और तीनों काल-सम्बन्धी पदार्थोंको स्पष्ट जानते थे और इसी लिये देवोंको भी ज्ञान प्रदान करनेमें समर्थ थे। संसारके माने हुए ईश्वर यदि किसीको सुख प्राप्त करनेका उपदेश भी देते थे तो उससे प्राप्त होनेवाला सुख बाह्य, हीन, संसारको बढ़ानेवाला और बाधक कारणोंके मिलने पर नष्ट हो जाने वाला ही होता था। इतना होने पर भी वे अपनेको परम परोपकारी समझ कर हर्षित होते थे परन्तु भगवान् वर्धमानके उपदेशसे लोगोंको जो सुख प्राप्त होता था वह उससे सर्वथा विपरीत था—आत्मीय, उत्कृष्ट, मोक्षसम्बन्धी और बाधारहित था। इतना होने पर भी वे रागसे रहित थे, उन्हें हर्ष-विषाद तथा अहंकार वगैरह कुछ भी नहीं होता था। इन विशेषताओंको दृष्टिगत करके आचार्य समन्तभद्रने ठीक ही कहा है कि आपके सिवाय आप जैसा और कौन ईश्वर है ? अर्थात् कोई भी नहीं है—आप अनुपम हैं ॥१०६॥

(यमकः)

कोविदो भवतोपीड्यः सुरानत नुतान्तरम् ।
शंसते साध्वसं सारं स्वमुद्यच्छन्नपीडितम् ॥१०७॥

कोविदेति—कोविदः विचक्षणः । भवतः संसारात् । अपीड्यः अबाधितः । हे सुरानत देवैः प्रणत । नुतान्तरं स्तुतिविशेषम् । शंसते आचष्टे । साध्वसं सम्भ्रमम् । सारं फलवत् । स्वं आत्मानं । उद्यच्छन् वहन् बिभ्रत् । ईडितमपि पूजाविधानमपि । अथवा ईडितं नुतान्तरं इति सम्बन्धः । समुदायार्थः – हे सुरानत योऽयं कोविदो जनः भवादपीड्य सन् नुतान्तरं शंसते आचष्टे स्वं साध्वसं सारं ईडितमपि उद्यच्छन् यस्मात् तस्मादहं स्तुतिविशेषेण तुभ्यं नतः ॥१०७॥

अर्थ—हे देवविनत ! जिनेन्द्र ! जो बुद्धिमान् पुरुष आपकी स्तुति तथा पूजा-विधान करता है उसका आत्मा शीघ्र ही सफल हो जाता है और वह संसारके दुःखोंसे पीडित नहीं होता—जन्म-मरणके दुःख नष्ट कर मोक्ष प्राप्त कर लेता है ॥

भावार्थ—हे भगवन् ! मैं भी तरह-तरहके स्तोत्रोंसे आपकी स्तुति कर रहा हूँ अतः मुझे भी मोक्षसुख प्रदान कीजिये ॥१०७॥

(समुद्गकयमकः)

[1]अभीत्यावर्द्ध मानेनः श्रेयोरुगुरु संजयन् ।
अभीत्या वर्धमानेन श्रेयोरुगुरु संजयन् ॥१०८॥

अभीत्येति—अभीत्य मम चेतस्यागत्य । अव रक्ष । ऋद्ध वृद्ध । मा अस्मदः इबन्तस्य रूपम् । अनेनः हे अपाप । श्रेयः सुखं । रुगुरु

१ अभीत्य+अव+ऋद्ध, मा+अनेनः, श्रेयः+रुगुरु (रुचा उरु), वर्धमान+इन, श्रेयः+रुगुः+उ (वितर्के) इति पदच्छेदाः । 'सूर्याश्वैर्मसजास्ततः गुरवः शार्दूलविक्रीडितम्' (वृत्तरत्नाकरे)

तेजसा महत् । संजयन् लगयन् । अभीत्या अभयेन दयया इत्यर्थः । हे वर्द्धमान जिनेश्वर । इन स्वामिन् । हे श्रेय सेव्य । उर्वी महती गौर्वाणी यस्यासौ उरुगुः त्वं दिव्यवाणीकः त्वं यतः । ऋ निपातः । संजयन् सम्यग्जयं कुर्वन् । किमुक्तं भवति — हे वर्द्धमान इन ऋद्ध अनेनः श्रेय उरुगुस्त्वं यतः ततः अभीत्या अभयेन श्रेयः रुगुरु संजयन् लगयन् जयंश्च मा अव रक्ष ॥१०८॥

अर्थ—हे वर्धमान जिनेन्द्र ! आप वृद्ध हैं—ज्ञानादिगुणोंसे बड़े हैं, केवलज्ञानके साथ होनेवाले अनन्तसुखको देनेवाले हैं, अभयसे—दयासे—उपलक्षित हैं, सबके स्वामी हैं, सेव्य हैं, उत्कृष्ट दिव्यध्वनिको धारण करनेवाले हैं और (कर्मरूप शत्रुओंको) जीतनेवाले हैं। हे प्रभो ! मेरे हृदयमें विराजमान होकर मेरी रक्षा कीजिये।

भावार्थ—यद्यपि बुलानेसे जिनेन्द्रदेव किसीके हृदयमें नहीं पहुँच जाते तथापि भक्तियोगमें ऐसा कहा जाता है ॥१०८॥

(द्व्यक्षरवृत्तं शार्दूलविक्रीडितम्)

नानानन्तनुतान्त तान्तितनिनुन्नुन्नान्त नुन्नानृत
नृतीनेन नितान्नतानितनुते नेतोन्नतानां ततः ।
नुन्नातीतितनून्नतिं नितनुतान्नीतिं निनूतातनु-
न्तान्तानीतिततान्नुतानन नतान्नो नूतनैनोत्तु नो ॥१०९॥

नानेति—श्रीवर्धमान इत्यनुवर्तते । नाना अनेकप्रकाराः । अनन्ताः अनूनाः अमेयाः नुताः स्तुता अन्ता धर्माः यस्यासौ नानानन्तनुतान्तः तस्य सम्बोधनं हे नानानन्तनुतान्त अनेकप्रकारामेयस्तुतगुण इत्यर्थः । तांतं खेदं करोतीति 'तत्करोति तदाचष्टे इत्यादिना सूत्रेण णिच्' । तान्तिः 'अतः भावे क्तः इति क्तः' तान्तितं भवति । तान्तितं दुःखं निनुदति प्रेरयति इति तान्ति निनुत् तस्य सम्बोधनं हे तान्तितनिनुत् ।

नुन्नः विनष्टः अन्तो विनाशो यस्यासौ नुन्नान्तः तस्य सम्बोधनं हे नुन्नान्त । नुन्नं विनाशितं अनृतं असत्यं यस्यासौ नुन्नानृतः तस्य सम्बोधनं हे नुन्नानृत विनष्टासत्य । नूतीनां स्तुतीनां इनाः स्वामिनः नूतीनाः नूतीनानां इनः स्वामी नूतीनेनः तस्य सम्बोधनं हे नूतीनेन गणधरेन्द्रादिस्वामिन् । नितान्तं अत्यर्थं तानिता विस्तारिता नुतिः कीर्तिः स्तुतिर्वा यस्यासौ नितान्ततानितनुतिः तस्य सम्बोधनं हे नितान्ततानितनुते अत्यर्थविस्तारितकीर्ते । अथवा नूतीनेनेन गणधरेन्द्रेण नितान्ततानितनुते । नेता नायकः । उन्नतानां इन्द्रादिप्रभूणाम् । ततः तस्मात् । तनुः शरीरं तनोरुन्नतिर्महत्त्वं तनून्नतिः अतीतिर्विनाशः, अतीतिश्च तनून्नतिश्च अतीतितनून्नती, नुन्ने विनाशिते अतीतितनून्नती यया सा नुन्नातीतितनून्नतिः तां नुन्नातीतितनून्नतिम् । नितनुतात् कुरुतात् । नीतिं बुद्धिं विज्ञानम् । अथवा नुन्नातीतितनून्नतिं नितनुतात् नीतिं च । च शब्दोनुक्तोऽपि द्रष्टव्यः । निनूत स्तुत सुपूजित । अतनुं महतीं । तान्तान् दुःखितान् । ईतिततान् व्याधिव्याप्तान् । हे नुतानन नुतं स्तुतं आननं मुखं यस्यासौ नुताननः तस्य सम्बोधनं हे नुतानन । नतान् प्रणतान् । नः अस्मान् । नूतनं अभिनवं एनः पापं नूतनैनः । अत्त भक्षयतु । नो प्रतिषेधे । किमुक्तं भवति—हे श्रीवर्द्धमान नानानन्तनुतान्त यतः उन्नतानां नेता त्वं ततः नीतिं नुन्नातीतितनून्नतिं अतनुं नितनुतात् नतान् नः अस्मान् तान्तान् ईतिततान् नो नितनुतात् नूतनैनश्च अत्त भक्षयतु अन्यानि विशेषणानि भट्टारकस्य विशेषणानि ॥१०६॥

अर्थ—हे श्रीवर्धमान ! अनेक भव्य जीवोंने आपके विविध गुणोंकी स्तुति की है, आप दुःखोंको नष्ट करनेवाले हैं, अन्त-रहित हैं, आपने एकान्तवादरूप असत्यको नष्ट करदिया है, गणधरादि देवोंने आपकी कीर्तिको अत्यन्त विस्तृत किया है—आपके शासनका प्रचार कर आपका उज्ज्वल यश सब ओर फैलाया है। आप इन्द्र आदि उत्तम पुरुषोंके नायक हैं, पूजित

हैं और आपका मुख भी अत्यन्त प्रशंसनीय है। हे पूज्य ! हम लोग सांसारिक दुःखोंसे पीड़ित हैं, अनेक व्याधियोंसे घिरे हुए हैं और आपके चरणोंमें विनत हैं। आप हम लोगोंको वह केवलज्ञानरूप महाविद्या प्रदान कीजिये जो कि जन्ममरणको नष्ट करनेवाली है। इसके सिवाय हे प्रभो ! हमारे इन नये बँधनेवाले पापोंको भी नष्ट कर दीजिये अर्थात् संवर और निर्जराकी पूर्ण कला सिखलाकर हमें शीघ्र बन्धन-मुक्त कीजिये ॥१०६॥

(चक्रवृत्तम्[1])

वंदारुप्रबलाजवंजवभयप्रध्वंसिगोप्राभव
वर्द्धिष्णो विलसद्गुणार्णव जगन्निर्वाणहेतो शिव ।
वंदीभूतसमस्तदेव वरद प्राज्ञैकदक्षस्तव
वंदे त्वावनतो वरं भवभिदं वर्यैवंकद्याभव ॥११०॥

---

१ 'षडरं चक्रमालिख्यारमध्ये स्थापयेत्कविः ।
त्रीन्पादान्नेमिमध्ये तु चतुर्थं चक्रवृत्तके ॥'
—अलंकारचिन्तामणिः ।

छह अरोंवाला एक चक्र बनाकर अरोंके बीचमें प्रारम्भके तीन पाद लिखने चाहियें, अवशिष्ट चौथापाद नेमि—चक्रधारा—अन्तिमपरिधिमें लिखना चाहिये। इसी प्रकार अन्यत्र आये हुए चक्रोंकी रचना समझना चाहिये। इस अलंकारमें कभी-कभी अपना इष्टतम—मनचहा—पाद गूढ भी हो जाता है अर्थात् उस पादके समस्त अक्षर शेषके तीन पादोंमें समाविष्ट हो जाते हैं; जैसा कि इस ग्रन्थके १११ और ११२ नं० के श्लोकोंमें हुआ है। कभी-कभी कविका नाम भी श्लोकके किसी वलयमें आजाता है; जैसा कि ११६ नं० के श्लोकके बाहरसे भीतरकी ओर सातवें वलयमें 'शान्तिवर्मकृतं' आगया है। शान्तिवर्मा समन्तभद्रका दूसरा जन्मनाम है और जो उनके क्षत्रिय कुलोत्पन्न होनेका द्योतक है।

वन्देति—षडरं चक्रं भूमौ फलके वा व्यालिख्य त्रयः पादाः अरमध्ये स्थाप्याः। चतुर्थपादो नेमिमध्ये एवं च सर्वचक्रवृत्तानि द्रष्टव्यानि।

वन्दारवः वन्दनशीला प्रबलं प्रचुरं आजवंजवः संसारः भयं भीः आजवंजवाद्भयं आजवंजवभयं प्रबलं च तत् आजवंजवभयं च तत् प्रबलाजवंजवभयं। वन्दारूणां प्रबलाजवंजवभयं वन्दारुप्रबलाजवंजवभयं। तत् प्रध्वंसयति विनाशयतीत्येवंशीलं वन्दारुप्रबलाजवंजवभयप्रध्वंसि। प्रभोर्भावः प्राभवम्। गोर्वाण्याः प्राभवं प्रभुत्वं गोप्राभवं वाणीमाहात्म्यमित्यर्थः। वन्दारुप्रबलाजवंजवभयप्रध्वंसि गोप्राभवं यस्यासौ वन्दारुप्रबलाजवंजवभयप्रध्वंसिगोप्राभवः तस्य सम्बोधनं वन्दारुप्रबलाजवंजवभयप्रध्वंसिगोप्राभव। वर्द्धिष्णो वर्द्धनशील। गुणा एव अर्णवो गुणार्णवः विलसन् शोभमानो गुणार्णवो गुणसमुद्रो यस्यासौ विलसद्गुणार्णवः तस्य सम्बोधनं विलसद्गुणार्णव। निर्वाणस्य मोक्षस्य हेतुः कारणं निर्वाणहेतुः। जगतां भव्यलोकानां निर्वाणहेतुः जगन्निर्वाणहेतुः। तस्य सम्बोधनं हे जगन्निर्वाणहेतो। शिव परमात्मन् वन्दीभूताः मङ्गलपाठकीभूताः समस्ताः देवाः विश्वे सुरवराः यस्यासौ वन्दीभूतसमस्तदेवः तस्य सम्बोधनं हे वन्दीभूतसमस्तदेव। वरद इष्टद। प्राज्ञानां मतिमतां एकः प्रधानः प्राज्ञैकः। दक्षाणां विचक्षणानां स्तवः स्तुतिवचनं यस्यासौ दक्षस्तवः अथवा दक्षैः स्तूयते इति दक्षस्तवः प्राज्ञैकश्चासौ दक्षस्तवश्च प्राज्ञैकदक्षस्तवः तस्य सम्बोधनं प्राज्ञैकदक्षस्तव। वन्दे स्तुवे। त्वा भवन्तम्। अवनतः प्रणतः। वरं श्रेष्ठम्। भवभिदं संसारस्य भेदकम्। हे वर्य शोभन। एकः वन्द्यः एकवन्द्यः तस्य सम्बोधनं हे एकवन्द्य। संसारित्वेन न भवति इत्यभवः तस्य सम्बोधनं हे अभव। एतदुक्तं भवति—हे वर्द्धमान भट्टारक! सम्बोधनान्तानि सर्वाणि विशेषणानि अस्यैव भवन्ति। वन्दे अवनतो भूत्वाऽहं त्वा। किं विशिष्टं वरं भवभिदम् इति ॥११०॥

अर्थ—हे भगवन्! जो आपको नमस्कार करते हैं

उनका संसार-सम्बन्धी प्रचुरभय आपकी दिव्यध्वनिके माहात्म्यसे नष्ट होजाता है। आप ज्ञानादिगुणोंसे हमेशा बढ़ते ही रहते हो, अपका गुणरूपी समुद्र बड़ा सुन्दर है। आप संसारी जीवोंकी मुक्तिके कारण हो, कल्याणरूप हो। समस्तदेव आपके बंदी हैं-चारण हैं-सदा ही आपका गुणगान किया करते हैं। आप मनोवाञ्छित वरोंको देनेवाले हो। श्रेष्ठज्ञानी हो, बड़े बड़े चतुर मनुष्य आपका स्तवन किया करते हैं, आप सर्वोत्कृष्ट हो, संसारपरिभ्रमणको नष्ट करनेवाले हो, पूज्य हो, वन्दनीय हो और पञ्च-परावर्तनरूप संसारसे रहित हो। हे प्रभो! भक्तिसे प्रणत होता हुआ मैं भी आपको नमस्कार करता हूं ॥११०॥

(इष्टपादवलयप्रथमचतुर्थपञ्चमवलयैकाक्षरचक्रवृत्तम्[1])

नष्टाज्ञान मलोन शासनगुरो नम्रं जनं पानिन
नष्टग्लान सुमान पावन रिपूनप्यालुनन् भासन।
नत्येकेन रुजोन सज्जनपते नन्दन्ननन्तावन
नन्तॄन् हानविहीनधामनयनो न स्तात्पुनन् सज्जिन ॥१११॥

नष्टाज्ञानेति—नष्टं विनष्टं अज्ञानं यस्यासौ नष्टाज्ञानः तस्य सम्बोधनं हे नष्टाज्ञान। मलेन कर्मणा ऊनः रहितः मलोनः तस्य सम्बोधनं हे मलोन। शासनस्य दर्शनस्य आज्ञाया वा गुरुः स्वामी शासनगुरुः तस्य सम्बोधनं हे शासनगुरो। नम्रं नमनशीलम्। जनं भव्यलोकम्। पान् रक्षन्। इन स्वामिन्। नष्टं विनष्टं ग्लानं मूर्च्छादिकं यस्यासौ नष्टग्लानः तस्य सम्बोधनं हे नष्टग्लान। शोभनं मानं विज्ञानं यस्यासौ सुमानः तस्य सम्बोधनं हे सुमान। पावन पवित्र। रिपूनपि अन्तः शत्रून् अप्यालुनन् आ समन्तात् खण्डयन्। भासन शोभन। नतीनां प्रणतीनां एकः

1 इष्टः पादो वलयरूपो भवतीत्यर्थः। इसमें मनोनीत पाद वलयमें लिखा जा सकता है।

प्रधान: इन: स्वामी नत्येकेन: तस्य सम्बोधनं हे नत्येकेन । रुजया रोगेण ऊन: रुजोन: तस्य सम्बोधनं हे रुजोन। सज्जनानां पति: सज्जनपति: तस्य सम्बोधनं हे सज्जनपते। नन्दन् आनन्दं कुर्वन्। अनन्त अविनाश। अवन रक्षक। नन्तॄन् स्तोतॄन्। हानेन क्षयेण विहीनं ऊनं हानविहीनं धाम तेजः हानविहीनं च तत् धाम च हानविहीनधाम,हानविहीनधामैव नयनं यस्यासौ हानविहीनधामनयन: त्वम्। नः अस्मान्। स्तात् भव। पुनन् पवित्रीकुर्वन्। हे सज्जिन शोभनजिन। एतदुक्तं भवति—हे भट्टारक नष्टाज्ञान नम्रं जनं पान् रिपूनप्यालुनन् नन्तॄन् नन्दन् न: अस्मान् पुनन् हानविहीनधामनयनस्त्वं स्तात्। शेषाणि सर्वाणि सम्बोधनान्तानि पदानि अस्यैव विशेषणानि भवन्तीति ॥१११॥

अर्थ—भगवन्! आपका अज्ञान नष्ट हो गया है, आप कर्ममलसे रहित हैं, जैनशासन अथवा अप्रतिहत आज्ञाके स्वामी हैं,मूर्च्छादिक परिग्रहसे रहित हैं। आपका ज्ञान अत्यन्त शोभायमान है,आप अत्यन्त पवित्र हैं, प्रकाशमान हैं,नमस्कारके मुख्य स्वामी हैं—इन्द्रादि सब प्रधान पुरुष आपको ही नमस्कार करते हैं। आप रोगरहित हैं, सज्जनोंके अधिपति हैं, अन्तरहित हैं, रक्षक हैं, अथवा अनन्त प्राणियोंके रक्षक हैं और उत्तम जिनेन्द्र हैं। हे प्रभो! आप नम्र मनुष्योंकी रक्षा करते हुए, काम-क्रोध आदि अन्तरङ्ग शत्रुओंको नष्ट करते हुए, नमस्कार करनेवालोंको समृद्ध-सम्पन्न करते हुए और मुझ समन्तभद्रको पवित्र—राग-द्वेषसे रहित—करते हुए चिरकाल तक हानिविहीन केवल-ज्ञान-लोचनसे युक्त तिष्ठें ॥१११॥

(इष्टपादवलयप्रथमचतुर्थसप्तमवलयैकाक्षरचक्रवृत्तम्)

रम्यापारगुणारजस्सुरवरैरर्च्याक्षर श्रीधर
रत्यूनारतिदूर भासुर सुगीरर्य्योत्तर्द्धीश्वर ।
रक्तान् क्रूरकठोरदुर्द्धररुजोरक्षन् शरण्याजर
रक्षाधीर सुधीर विद्वर गुरो रक्तं चिरं मा स्थिर ॥ ११२॥

रम्येति—इष्टपादो वलयरूपेण भवतीत्यर्थः । रम्य रमणीय । अपारगुण अपरिमेयगुण । अरजः ज्ञानावरणादिकर्मरहित । सुरवरैः देवप्रधानैः । अर्च्य पूज्य । अक्षर अनश्वर । श्रीधर लक्ष्मीभृत् । रत्या रागेण ऊन रहित । अरतेर्दूरः विप्रकृष्टः अरतिदूरः तस्य सम्बोधनं हे अरतिदूर । भासुर भास्वर । शोभना गीर्वाणी यस्यासौ सुगीः स्वमिति सम्बन्धः । अर्य स्वामिन् । उत्तराः प्रकृष्टाः ऋद्धयो विभूतयः उत्तरर्द्धयः उत्तरर्द्धीनां ईश्वरः स्वामी उत्तरर्द्धीश्वरः तस्य सम्बोधनं हे उत्तरर्द्धीश्वर । रक्तान् भक्तान् । क्रूरा रौद्रा, कठोरा निष्ठुरा, दुर्द्धरा असह्या, रुक् व्याधिः, क्रूरा चासौ कठोरा च क्रूरकठोरा, क्रूरकठोरा चासौ दुर्द्धरा च क्रूरकठोरदुर्द्धरा, क्रूरकठोरदुर्द्धरा चासौ रुक् च क्रूरकठोरदुर्द्धररुक् तस्याः रक्षन् प्रतिपालयन् । शरण्य शरणीय । अजर जराहीन । रक्ष पालय । आधिर्मनः पीडा आधिं इरति क्षिपतीत्याधीरः तस्य सम्बोधनं हे आधीर । सुधीर अक्षोभ । विदां पण्डितानां वरः प्रधानः विद्वरः तस्य सम्बोधनं हे विद्वर । गुरो स्वामिन् । रक्तं भक्तम् । चिरं अत्यर्थम् । मा अस्मदः प्रयोगः । स्थिर नित्य । एतदुक्तं भवति—हे भट्टारक रम्य इत्यादि गुणविशिष्ट क्रूरकठोरदुर्द्धररुजो रक्तान् रक्षन् मा रक्तं रक्ष ॥११२॥

अर्थ—हे अत्यन्त सुन्दर ! हे अनन्तगुणोंके धारक ! हे ज्ञानवरणादि-कर्मसमूहसे रहित ! हे इन्द्रोंके द्वारा पूज्य ! हे अविनाशी ! हे समवसरणादि लक्ष्मीके धारक ! हे रागरहित ! हे द्वेषसे दूर रहनेवाले ! हे शोभायमान ! हे उत्तम वाणीके

धारक ! हे स्वामिन् ! हे श्रेष्ठ ऋद्धियोंके नायक ! हे रक्षक ! हे जरारहित ! हे मानसिक व्यथाओंको हरनेवाले ! हे क्षोभ-रहित ! हे विद्वानोंमें श्रेष्ठ ! हे गुरो ! हे नित्य ! श्रीवर्द्धमान जिनेन्द्र ! आप अपने भक्त जनोंको भयंकर निष्ठुर और दुर्धर--कष्टसाध्य रोगोंसे रक्षित करते हुए मुझ चिरस्नेही (समन्तभद्र) की भी रक्षा कीजिये ॥११२॥

उपसंहार

(चक्रवृत्तम्)

प्रज्ञा सा स्मरतीति या तव[1] शिरस्तद्यन्नतं ते पदे
जन्मादः सफलं परं भवभिदी यत्राश्रिते ते पदे ।
मांगल्यं च स यो रतस्तव मते गीः सैव या त्वा स्तुते ।
ते ज्ञा ये प्रणता जनाः क्रमयुगे देवाधिदेवस्य ते ॥११३॥

प्रज्ञेति—प्रज्ञा बुद्धिः । सा तदः प्रयोगः । स्मरति चिन्तयति । इति शब्दः अवधारणार्थः । या यदः टावन्तस्य रूपम् । तव ते 'स्मृत्यर्थदयेशां कर्मणीति ता भवति' । शिरः मस्तकम् । तत् यत् । नतं प्रणतम् । ते तव । पदे चरणे । जन्म गत्यन्तरगमनम् । अदः अदसः अपरोक्षवाचिनो रूपम् एतदित्यर्थः । सफलं सकार्थम् । परं श्रेष्ठम् । भवभिदी संसारभेदिनी । यत्र यस्मिन् । आश्रिते सेविते । ते तव । पदे चरणयुगलम् । माङ्गल्यं पूतं । च शब्दः समुच्चयार्थः । सः तदो रूपम् । यः यदो रूपम् । रतः रक्तः भक्तः । तव ते । मते आगमे । गीः वाक् । सैव सा एव नान्या । या त्वा भवन्तम् । स्तुते वन्दते । ते तदः जसन्तं

1 'अधीगर्थदयेशां कर्मणि' इति षष्ठी ।

रूपम्। ज्ञाः पण्डिताः। ये यदो जसन्तं रूपम्। प्रणताः प्रकर्षेण नताः। जना भक्तभव्यलोकाः। क्रमयुगे चरणद्वन्द्वे। देवानामधिदेवः परमात्मा देवाधिदेवः तस्य देवाधिदेवस्य। ते तव। स्तुत्यवमाने कृतकृत्यः सन् आचार्यः समन्तभद्रस्वामी उपसंहारकं करोति। किमुक्तं भवति—भट्टारक सैव प्रज्ञा या त्वा स्मरति। शिरश्च तदेव यन्नतं ते पदे इत्येवमादि योज्यम् ॥११३॥

अर्थ—हे देवाधिदेव! बुद्धि वही है जो कि आपका स्मरण करे—आपका ध्यान करे, मस्तक वही है जो कि आपके चरणोंमें नत रहे—झुका रहे, जन्म वही सफल और श्रेष्ठ है जिसमें संसार परिभ्रमणको नष्ट करनेवाले आपके चरणोंका आश्रय लियागया हो, पवित्र वही है जो कि आपके मतमें अनुरक्त हो, वाणी वही है जो कि आपकी स्तुति करे, और बुद्धिमान-पंडितजन वे ही हैं जो कि आपके दोनों चरणोंमें नत हैं।

[यहां परिसंख्याऽलंकार[१] है]

(चक्रवृत्तम्)

सुश्रद्धा मम ते मते स्मृतिरपि त्वय्यर्चनं चापि ते
हस्तावंजलये कथाश्रुतिरतः कर्णोऽक्षि संप्रेक्षते।
सुस्तुत्यां व्यसनं शिरो नतिपरं सेवेदृशी येन ते
तेजस्वी सुजनोऽहमेव सुकृती तेनैव तेजःपते ॥११४॥

सुश्रद्धेति—सुश्रद्धा सुरुचिः। मम अस्मदः प्रयोगः। ते तव।

१ सर्वत्र संभवद्वस्तु यत्र क्व युगपत्पुनः।
एकत्रैव नियम्येत परिसंख्या तु सा यथा ॥
— अलंकारचिन्तामणि।

सर्वत्र (सबमें) संभव होनेवाली वस्तुका किसी एकमें ही नियम करदेना परिसंख्या अलंकार कहलाता है।

मते विषये। स्मृतिरपि स्मरणमपि। त्वयि युष्मदः ईबन्तस्य रूपम्। अर्चनं चापि पूजनं चापि त्वय्येवेति सम्बन्धः। च शब्दः समुच्चयार्थः। ते तव। हस्तौ करौ। अञ्जलये अञ्जलिनिमित्तं ते इत्यनेन सम्बन्धः। कथा गुणस्तवनं। कथायाः श्रुतिः श्रवणं कथाश्रुतिः। तस्यां रतः रक्तः कथाश्रुतिरतः। कर्णः श्रवणम्। अक्षि चक्षुः। सम्प्रेक्षते संपश्यति तं रूपमिति सम्बन्धः सामर्थ्याल्लभ्यते। सुस्तुत्यां शोभनस्तवनं। व्यसनं तत्परत्वम्। शिरः मस्तकम्। नतिपरं प्रणामतत्परम्। सेवा सेवनम्। ईदृशी ईदृग्भूता। प्रत्यक्षवचनमेतत्। येन यदो भान्तस्य रूपं येन कारणेनेत्यर्थः। ते तव। तेजस्वी भास्वान्। सुजनः शोभनजनः। अहं अस्मदो वान्तस्य रूपम्। एव अवधारणार्थः। अहमेव नाऽन्यः। सुकृती पुण्यवान्। तेनैव तदो भान्तस्य रूपं। तेनैव कारणेनेत्यर्थः। हे तेजःपते केवलज्ञानस्वामिन्। समुदायार्थः—मम श्रद्धा या मम स्मृतिश्च या सा तवैव मते, ममार्चनमपि यत्तत् त्वय्येव, मम हस्तौ यौ त्वत्प्रणामाञ्जलिनिमित्तम्, कर्णश्च मम ते कथाश्रुतिरतः, अक्षि च मम तव रूपदर्शननिमित्तम्, मम व्यसनमपि तव स्तुत्याम्, शिरश्च मम तव नतिपरम्। येन कारणेन ईदृशी सेवा मम हे तेजःपते तेनैव कारणेन अहमेव तेजस्वी सुजनः सुकृती नान्य इत्युक्तं भवति ॥११४॥

अर्थ—हे भगवन्! मेरी श्रद्धा केवल आपके ही मतमें है, मैं स्मरण भी आपका ही करता हूँ, पूजन भी आपका ही करता हूं, मेरे हाथ भी आपको अंजलि बांधने (हाथ जोड़ने) के लिये ही हैं, मेरे कान भी आपकी कथा सुननेमें आसक्त हैं, मेरी आँखें केवल आपके रूपको देखती हैं—आपके दर्शन करती हैं, मुझे व्यसन आपकी स्तुति करनेका ही है—मैं हमेशा आपकी स्तुतिमें ही लगा रहता हूँ—और मेरा मस्तक भी आपको नमस्कार करनेमें तत्पर रहता है। हे तेजःपते!—हे केवलज्ञानके स्वामी! इस तरह मैं आपकी सेवा करता हूं इसीलिये संसारमें मैं तेजस्वी सुजन और पुण्यवान् ही हूं।

भावार्थ—जिनेन्द्रकी आराधना करनेवाले मनुष्यकी आत्मा आत्मीय तेजसे जगमगा उठती है, वह सर्वोत्कृष्ट पुरुष गिनाजाने लगता है तथा उसके महान् पुण्यका बन्ध होता है। यहां आचार्य समन्तभद्रने भगवान्की आराधना कर अपने आपको उसके फलका अधिकारी बतलाया है। यहां परिसंख्याके साथ काव्यलिङ्ग[1] अलंकार भी है ॥११४॥

(चक्रवृत्तम्)

जन्मारण्यशिखी स्तवः स्मृतिरपि क्लेशाम्बुधेर्नौः पदे।
भक्तानां परमौ निधी प्रतिकृतिः सर्वार्थसिद्धिः परा।
वन्दीभूतवतोपि[2] नोन्नतिहतिर्नन्तुश्च येषां मुदा।
दातारो जयिनो भवन्तु वरदा देवेश्वरास्ते सदा ॥११५॥

जन्मेति—जन्म संसारः, अरण्यं अटवी, शिखी अग्निः, जन्मैवारण्यं जन्मारण्यम्, जन्मारण्यस्य शिखी जन्मारण्यशिखी। स्तवः गुणस्तवनम्। स्मृतिरपि स्मरणमपि। क्लेशाम्बुधेः दुःखसमुद्रस्य नौः पोतः। पदे पादौ। भक्तानामनुरक्तानां। परमौ श्रेष्ठौ। निधी द्रव्यनिधाने। प्रतिकृतिः प्रतिबिम्बम्। सर्वार्थानां सकलकार्याणां सिद्धिः निष्पत्तिः सर्वार्थसिद्धिः। परा प्रकृष्टा। वन्दीभूतवतोपि मंगलपाठकीभूतवतोपि नग्नाचार्यरूपेण भवतोपि[3] ममेत्यर्थः। न प्रतिषेधवचनम्। उन्नतेः माहात्म्यस्य हतिः हननं उन्नतिहतिः। नन्तुश्च स्तोतुश्च। येषां यदः

1 'हेतोर्वाक्यपदार्थत्वे काव्यलिंगं निगद्यते' —साहित्यदर्पण

जहां हेतु वाक्य अथवा पदार्थगत होता है उसे 'काव्यलिङ्ग' कहते हैं।

2 ममेति योजनीयम्।

3 जायमानस्यापि मम।

आमन्तस्य रूपम् । मुदा हर्षेण । दातारो दानशीलाः । जयोऽस्ति येषां ते जयिनः । भवन्तु सन्तु । वरं ददत इति वरदाः स्वेष्टदायिनः । देवानां सुराणां ईश्वराः स्वामिनः देवेश्वराः । ते तदो जसन्तस्य रूपम् । सदा सर्वकालम् । एतदुक्तं भवति —येषां स्तवः जन्मारण्यशिखी भवति, येषां स्मृतिरपि क्लेशाम्बुधेश्च नौ भवति, येषां च पदे भक्तानां परमो निधी भवतः, येषां च प्रतिकृतिः सर्वार्थसिद्धिः परा, येषां नन्तुमुदा बन्दीभूतवतोपि नोन्नतिहतिः, ते देवेश्वराः दातारः जयिनः वरदाः भवन्तु सदा सर्वकालम् ॥११५॥

अर्थ—जिनका स्तवन संसाररूप अटवीको नष्ट करनेके लिये अग्निके समान है, जिनका स्मरण दुःखरूप समुद्रसे पार होनेके लिये नौकाके समान है, जिनके चरण भक्त पुरुषोंके लिये उत्कृष्ट निधान-खजानेके समान हैं, जिनकी श्रेष्ठ प्रतिकृति—प्रतिमा--सब कार्योंकी सिद्धि करने वाली है और जिन्हें हर्षपूर्वक प्रणाम करनेवाले एवं जिनका मङ्गलगान करनेवाले—नग्नाचार्यरूपसे (पक्षमें स्तुतिपाठक-चारण-रूपसे) रहते हुए भी मुझ-समन्तभद्रकी उन्नतिमें कुछ बाधा नहीं होती वे देवोंके देव जिनेन्द्र भगवान्, दानशील, कर्मशत्रुओंपर विजय पानेवाले और सबके मनोरथोंको पूर्ण करनेवाले हों ।

भावार्थ—यहां पूर्वार्धके दो चरणोंमें रूपकालंकार है परन्तु तृतीय चरणमें विरोधालंकार प्रदर्शित किया गया है । वह इस प्रकार है—'जो किसीका बन्दी स्तुतिपाठक या चारण होकर उसे नमस्कार तथा उसका गुणगान करता है वह लोकमें बहुत ही अवनत कहलाता है परन्तु श्रीजिनेन्द्रदेवकी स्तुतिकरने—उनका बन्दी-चारण बननेपर भी आचार्य समन्तभद्रकी महत्ता नष्ट नहीं हुई, बल्कि सातिशय पुण्य बन्धकर उन्होंने पहलेसे भी अधिक उत्कृष्टताको प्राप्त किया ।' विरोधका परिहार यही है कि 'महापुरुषोंके संसर्गसे सब विरोध दूर हो जाते हैं ॥११५॥

(कविकाव्यनामगर्भचक्रवृत्तम् [1])

गत्वैकस्तुतमेव वासमधुना तं येच्युतं स्वीशते
यन्नत्यैति सुशर्म पूर्णमधिकां शान्तिं व्रजित्वाध्वना ।
यद्भक्त्या शमिताकृशाघमरुजं तिष्ठेज्जनः स्वालये [2]
ये सद्भोगकदायतीव [3] यजते [4] ते मे जिनाः सुश्रिये ॥११६॥

गत्वेति षष्ठं नववलयं चक्रमालिख्य सप्तमवलये शान्तिवर्म-कृतं इति भवति । चतुर्थवलये जिनस्तुतिशतं इति च भवति अतः कवि-काव्यनामगर्भचक्रवृत्त भवति ।

गत्वा यात्वा । एव: प्रधान:, स्तुत: पूज्य:, एकश्चासौ स्तुतश्च एकस्तुत: तं एकस्तुतम् । एवकारोऽवधारणार्थ: । वासं मोक्षस्थानम् । अधुना साम्प्रतम् । तं तद: इवन्तस्यरूपम् । ये यदो जसन्तस्यरूपम् । अच्युतं अक्षयम् । स्वीशते सुष्ठु ऐश्वर्यं कुर्वते । येषां नति: स्तुति. यन्नति: तया यन्नत्या । एति आगच्छति । सुशर्म अनन्तसुखम् । पूर्णं सम्पूर्णम् । अधिकां महतीं प्रधानां । शान्तिं शमनम् । व्रजित्वा गत्वा । अध्वना सम्यग्दर्शनज्ञानचारित्रमार्गेण । येषां भक्ति: सेवा यद्भक्ति: तया यद्-भक्त्या । शमितं शान्तं नष्टं अकृषाघं, अकृशं महत् अघं पापं, अकृशं च तदघंच अकृषाघं, शमितं च तत् अकृषाघं च शमिताकृषाघम् क्रिया-

१ छह अरों तथा नव वलयोंसे युक्त चक्राकार रचना बनाकर उसमें श्लोकको पूर्वोक्त विधिसे लिखना चाहिये । इस श्लोकके सातवें वलयमें 'शान्तिवर्मकृतं' और चौथे वलयमें 'जिनस्तुतिशतं' निकलता है । अत: यह श्लोक 'कविकाव्यनामगर्भचक्रवृत्त' कहलाता है ।

२ 'सु + आलये' 'स्व + आलये' इति वा सन्धि: ।

३ 'सद्भोगकदा: + अतीव' इति सन्धि: ।

४ यजते इति शत्रन्तस्य यजधातोश्चतुर्थ्यां रूपम् । पूजकाये-त्यर्थ: । 'यज देवपूजासंगतिकरणदानेषु' इति यजधातोरर्था: ।

विशेषणमेतत्। रुजा रोगः न विद्यते रुजा यस्मिन् तत् अरुजम्। तिष्ठेत् आस्येत। जनः भव्यलोकः। स्वालये शोभनस्थाने। ये यदो जसन्तस्य रूपम्। भोगः सुखांगं सन् शोभनो भोगः सद्भोगः सद्भोग एव सद्भोगकः तं सद्भोगकं ददत इति सद्भोगकदाः शोभनभोगदातारः इत्यर्थः। अतीव अत्यर्थम्। यजते पूजकाय यज देवपूजासंगतिकरणदानेषु इत्यस्य धोः शत्रन्तस्य रूपम्। ते तदो जसन्तस्य रूपं परोक्षवाचि। मे मम। जिनाः श्रीमदर्हन्तः। शोभना श्रीः सुश्रीः तस्यै सुश्रिये। भवन्त्वित्यध्याहार्यम्। किमुक्तं भवति—एवंगुणविशिष्टाः जिनाः ते मे भवन्तु सुश्रिये मोक्षायेत्यर्थः ॥११६॥

अर्थ—जो इस समय परम पूज्य और विनाशरहित मोक्षस्थानको पाकर परमैश्वर्यका अनुभव कररहे हैं, जिनको नमस्कार करने मात्रसे पूर्ण-अनन्त सुख प्राप्त हो जाता है, जिनकी भक्तिसे यह जीव अधिक शान्तिको पाकर सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चरित्ररूप मार्गके द्वारा स्वालयमें—उत्तम आलय अथवा आत्मआलयमोक्ष-मन्दिरमें—जाकर निवास करता है और इसके बड़ेसे बड़े पाप नष्ट हो जाते हैं तथा सब रोग दूर हो जाते हैं। और जो अपने पूजकों—भक्तोंके लिये उत्तम भोग प्रदान करते हैं वे देवाधिदेव जिनेन्द्र भगवान् मेरे—समन्तभद्रके—लिये भी मोक्षरूप लक्ष्मी प्रदान करें। अर्थात् मेरी मुक्तिश्रीकी प्राप्तिमें प्रधान सहायक बनें।

इति कवि-गमकि-वादि-वाग्मित्व-गुणालंकृतस्य श्रीसमन्तभद्रस्य कृतिरियं स्तुतिविद्या जिनशतालङ्कारापरनाम समाप्ता।

स्तुतिविद्याके पद्योंका वर्णाऽनुक्रम

परिशिष्ट

यहाँ काव्य-चित्रोंके कुछ उदाहरण अपने-अपने काव्यके साथ दिये जाते हैं, जिससे उनके विषयका यथेष्ट परिज्ञान हो सके। साथमें चित्रोंका ठीक परिचय प्राप्त करनेके लिये जरूरी सूचनाएँ भी दी जा रही हैं। इन सबको देनेसे पहले चित्रालङ्कार-सम्बन्धी कतिपय सामान्य नियमोंका उल्लेख कर देना आवश्यक है, जिससे किसी प्रकारके भ्रमको अथवा चित्रभङ्गकी कल्पनाको कहीं कोई अवकाश न रहे।

चित्रालङ्कारोंके सामान्य नियम—

(१) "नाऽनुस्वार-विसर्गौ च चित्रभङ्गाय संमतौ।"

'अनुस्वार और विसर्गका अन्तर होनेसे चित्राऽलङ्कार भंग नहीं होता।'

(२) "यमकादौ भवेदैक्यं डलो रलो र्वबोस्तथा।"

'यमकादि अलङ्कारोंमें ड-ल, र-ल और व-ब में अभेद होता है।'

(३) यमकादि चित्रालङ्कारोंमें कहीं कहीं श-ष और न-ण में भी अभेद होता है; जैसा कि निम्न संग्रह श्लोकसे जाना जाता है—

"यमकादौ भवेदैक्यं डलयो रलयोर्वबोः।
शषयोर्नणयोश्चान्ते सविसर्गाऽविसर्गयोः
सबिन्दुकाऽबिन्दुकयोः स्यादभेद-प्रकल्पनम्॥"

काव्य-चित्रोंके कुछ उदाहरण---

(१) मुरजबन्धः

श्रीमज्जिनपदाभ्याशं प्रतिपद्यागमां जये ।
कामस्थानप्रदानेशं स्तुतिविद्यां प्रसाधये ॥१॥

ये सामान्य मुरजबन्धके दो चित्र हैं। इनमें पूर्वार्धके विषमसंख्याङ्क (१, ३, ५, ७, ६, ११, १३, १५) अक्षरोंको उत्तरार्धके समसंख्याङ्क (२, ४, ६, ८, १ , १०, १४, १६) अक्षरोंके साथ क्रमशः मिलाकर पढ़नेसे श्लोकका पूर्वार्ध और उत्तरार्ध के विषमसंख्याङ्क अक्षरोंको पूर्वार्धके सम संख्याङ्क अक्षरोंके साथ क्रमशः

मिलाकर पढ़नेमें उत्तरार्ध बन जाता है। इसप्रकारके अन्य श्लोक ग्रन्थमें निम्नप्रकार हैं :—

२, ६, ७, ८, ६, २१, ३०, ३१, ३२, ३३, ३४, ३५, ३६, ४०, ४१, ४२, ४५, ४६, ५८, ५६, ६०, ६१, ६२, ६३, ६५, ६७, ६८, ६६, ७०, ७१, ७३, ७४, ७५, ७६, ७७, ७८, ८०, ८२, ६६, १०१, १०२, १०३, १०४, १०५।

(२) अर्धभ्रमः

धिया ये श्रितयेतार्त्या यानुपायान्वराननाः।
येपापा यातपारा ये श्रियायातानतन्वत ॥३॥

१	धि	या	ये	श्रि	त	ये	ता	र्त्या	८
२	या	नु	पा	या	न्व	रा	न	ना	७
३	ये	पा	पा	या	त	पा	रा	ये	६
४	श्रि	या	या	ता	न	त	न्व	त	५

इसी प्रकार ४, १८, १६, २०. २१, २७, ३६, ४३, ४४, ५६, ६०, ६२, श्लोकोंको जानना।

(३) गतप्रत्यागतार्द्धः

भासते विभुतास्तोना ना स्तोता भुवि ते सभाः।
याः श्रिताः स्तुत गीत्या नु नुत्या गीतस्तुताः श्रिया ॥१०॥

भा	स	ते	वि	भु	ता	स्तो	ना
याः	श्रि	ताः	स्तु	त	गी	त्या	नु

इस कोष्टकमें स्थित श्लोकके प्रथम-तृतीय चरणोंको उलटा

पढ़नेसे क्रमशः द्वितीय-चतुर्थ चरण बन जाते हैं। इसी प्रकारके श्लोक नं० ८३, ८८, ६५ हैं।

(४) गर्भे महादिशि चैकाक्षरश्चतुरक्षरश्चक्रश्लोकः

नन्द्यनन्तद्ध्यनन्तेन नन्तेनस्तेभिनन्दन।
नन्दनर्द्धिरनम्रो न नम्रो नष्टोभिनन्द्य न ॥२२॥

एवं २३, २४ श्लोकौ

यह श्लोकके प्रथमाक्षरको गर्भमें रखकर बनाया हुआ चार आरोंवाला वह चक्रवृत्त है जिसकी चार महादिशाओंमें स्थित चारों आरोंके अन्तमें भी वही अक्षर पड़ता है। अन्त और उपान्त्यके अक्षर दो दो बार पढ़े जाते हैं। २३, २४ नम्बरके श्लोक भी ऐसे ही चक्रवृत्त हैं।

(५) चक्रश्लोकः

वरगौरतनुन्देव वन्दे नु त्वाक्षयार्ज्जव ।
वर्ज्जयार्त्तिं त्वमार्याव वर्यामानोरुगौरव ॥२६॥

एवं ५३, ५४ श्लोकौ

यह श्लोकके प्रथमाक्षरको गर्भमें रखकर बनाया हुआ चार आरोंवाला चक्रवृत्त है। इसके प्रथमादि कोई कोई अक्षर चक्रमें एक बार लिखे जाकर भी अनेक बार पढ़नेमें आते हैं। ५३, ५४ नम्बरके श्लोक भी ऐसे ही चक्रवृत्त हैं।

(६) अनन्तरपाद-मुरजबन्धः

अभिषिक्तः सुरैर्लोकैस्त्रिभिर्भक्तः परैर्न कैः ।
वासुपूज्य मयीशेशस्त्वं सुपूज्यः कयीदृशः ॥४८॥

इस चित्रमें श्लोकका एक चरण अपने उत्तरवर्ती चरणके साथ मुरजबन्धको लिये हुए है। ऐसे दूसरे श्लोक नं० ६४, ६६, १०० पर स्थित हैं।

(७) यथेष्टैकाक्षरान्तरित-मुरजबन्धः

क्रमतामक्रमं क्षेमं धीमतामर्च्यमश्रमम ।
श्रीमद्विमलमर्चेमं वामकामं नम क्षमम ॥५०॥

मुरजबन्धके इस चित्रमें ऊपरके चित्रसे यह विशेषता है कि इसमें अपना इष्ट अक्षर (म) एक एक अक्षरके अन्तरसे पद्यके चारों ही चरणोंमें बराबर प्रयुक्त हुआ जान पड़ता है। इस प्रकारके दूसरे श्लोक ८६ और ६१ हैं।

(८) अनुलोमप्रतिलोमैकश्लोकः

नतपाल महाराज गीत्यानुत ममाक्षर ।
रक्ष मामतनत्यागी जराहा मलपातन ॥५७॥

न	त	पा	ल	म	हा	रा	ज	गी	त्या	नु	त	म	मा	क्ष	र

इस कोष्ठकमें स्थित पूर्वार्धको उल्टा पढ़नेसे उत्तरार्द्ध बन जाता है। इसी प्रकार श्लोक नं० ६६, ६८ भी अनुलोम-प्रतिलोम-क्रमको लिए हुए हैं।

(६) बहुक्रियापद-द्वितीयपादमध्य-यमकाऽतालुव्यञ्जना-ऽवर्णस्वर-गूढद्वितीयपाद-सर्वतोभद्रः

पारावाररवारापारा क्षमाक्ष क्षमाक्षरा ।
वामानाममनामावारक्ष मर्द्ध र्द्धमक्षर ॥८४॥

पा	रा	वा	र	र	वा	रा	पा
रा	क्ष	मा	क्ष	क्ष	मा	क्ष	रा
वा	मा	ना	म	म	ना	मा	वा
र	क्ष	म	र्द्ध	र्द्ध	म	क्ष	र
र	क्ष	म	र्द्ध	र्द्ध	म	क्ष	र
वा	मा	ना	म	म	ना	मा	वा
रा	क्ष	मा	क्ष	क्ष	मा	क्ष	रा
पा	रा	वा	र	र	वा	रा	पा

इस कोष्ठकमें ऊपरका श्लोक चारों ओरसे पढ़ा जाता है।

(१०) गतप्रत्यागतपाद-पादाभ्यासयमकश्लोकः

वीरावारर वारावी वररोरुरुरोरव ।
वीरावाररवारावी वारिवारिरि वारर वा ॥८५॥

इस कोष्ठकमें स्थित प्रत्येक चरणके पूर्वार्धको उल्टा पढ़नेसे उसका उत्तरार्ध बन जाता है। यह श्लोक दो अक्षरों (व, र) से बना है।

वी	रा	वा	र
व	र	रो	रु
वी	रा	वा	र
वा	रि	वा	रि

एवं ६३,६४ श्लोकौ।

(११) अनुलोम-प्रतिलोम-श्लोकयुगलम्

रक्ष माक्षर वामेश शमी चारुरुचानुतः ।
भो विभोनशनाजोरुनम्रेन विजरामय ॥८६॥

र	क्ष	मा	क्ष	र	वा	मे	श	श	मी	चा	रु	रु	चा	नु	तः
भो	वि	भो	न	श	ना	जो	रु	न	म्रे	न	वि	ज	रा	म	य

इस कोष्ठकमें स्थित श्लोकको उलटा पढ़नेसे नीचे लिखा ८७ वां श्लोक बन जाता है :—

यमराज विनम्रेन रुजोनाशन भो विभो ।
तन चारुरुचामीश शमेवारक्ष माक्षर ॥८७॥

य	म	रा	ज	वि	न	म्रे	न	रु	जो	ना	श	न	भो	वि	भो
त	नु	चा	रु	रु	चा	मी	श	श	मे	वा	र	क्ष	मा	क्ष	र

इस कोष्ठकमें स्थित श्लोकको उलटा पढ़नेसे पूर्वका ८६ वाँ श्लोक बन जाता है। इसीसे श्लोकका यह जोड़ा अनुलोम-प्रतिलोम कहलाता है।